193 √jñâ, to order, direct The root is always preceded by आङ्। When meaning to kill, &c, we have ज्ञपयति। Wh n meaning to understand, we have ज्ञपयति or विज्ञापयति। See Ghatâdi list in the Bhuâdi class The kryâdi form is जानाति। Pre. आज्ञापयति।

भज १९४ विश्राणने ।

194. √bhaja to give.

Pre भाजयति। The Bhuâdi is भजति or भजते। The Rudhâdi is भनक्ति।

शृधु १९५ प्रसहने ।

'अशशर्धत्-अशीशृधत्'।

195 √śridhu to insult, to mock, ridicule. The णिच् is optional because of the indicatory उ। Pre शर्धयति। शर्धति। Aor. अशशर्धत् or अशीशृधत् or अशीशृधत्। Ger शर्धित्वा or शृद्ध्वा।

यत १९६ निकारोपस्कारयोः ।

196. √yata, 'to endeavour.' The word 'nikâra' means 'endeavour,' 'direction.' Kshîrasvâmî reads निराकारोपस्कारयोः nirâkâra he explains to mean 'to overpower.' Preceded by निर् it means 'to give back.' As ऋणं निर्यातयेति 'he repays the debt.' Pre. यातयति ।

रक १९७ लग १९७ आस्वादने ।

'रघ' इत्येके । 'रग' इत्यन्ये ।

197. √raka, √laga to taste. Some read √ragha, others √raga instead of √raka. The Ghatâdi form is लगयति but the sense is different.

Pre. राकयति । लागयति । राघयति । रागयति ।

अञ्चु १९८ विशेषणे ।

अञ्चयति । उदित्वमिड्विकल्पार्थम् । अत एव विभाषितो णिच् । अञ्चति । एवं गुधुजसु-प्रभृतीनामपि बोध्यम् ।

198. √anchu to manifest. As अञ्चयति । The indicatory उ makes the augment इट् optional, consequently the णिच् is also optional. Thus अञ्चति । Similar is the case with the roots √śridhu, √jasu, &c, mentioned before.

लिगि १९९ चित्रीकरणे ।

लिङ्गयति–लिङ्गति ।

199 √ligi, to paint.

Pre. लिङ्गयति or लिङ्गति । The Bhuâdi लिङ्गति means 'to go'.

मुद २०० संसर्गे ।

मोदयति सक्तून्घृतेन ।

200. √muda to mix, blend As मोदयति सक्तून् घृतेन 'he mixes the gruel with clarified butter.'

त्रस २०१ धारणे ।

'ग्रहण' इत्येके । 'वारणे' इत्यन्ये ।

201. √trasa, to hold. Some read grahaṇe 'to take', others वारणे 'to obstruct,' instead of 'dhâraṇe'. Pre. त्रासयति ।

उध्रस २०२ उञ्छे ।

उकारो धात्ववयव इत्येके । नेत्यन्ये । ध्रासयति । उध्रासयति ।

202. √udhrasa, (to throw or toss up), to glean. Some say उ is part of the root. Others say it is not The root is kryâdi also.

Pre. ध्रासयति or उध्रासयति ।

मुच २०३ प्रमोचने मोदने च ।

203. √mucha to liberate, to gladden, delight. It is Bhuâdi and Tudâdi also. Pre. मोचयति ।

वस २०४ स्नेहच्छेदापहरणेषु ।

204 √vasa 1. to love, 2 to cut divide, 3 to take

Pre वासयति । Other forms are वस्ते 'he covers' (Adâdi No. 13), वस्यति 'he stops' (Divâdi No. 105), while वास is kathâdi.

चर २०५ संशये ।

205 √chara to doubt Pre चारयति । The Bhuâdi is चरति ।

च्यु २०६ सहने ।

'हसने च' इत्येके । च्यावयति । 'च्युस' इत्येके । च्योसयति ।

206. √chyu to laugh, to suffer pain. Some read it as च्युस √chyus. Pre. च्यावयति or च्योसयति ।

भुवोऽवकल्कने २०७ ।

अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । भावयति ।

207 √Bhû The root √bhu takes the affix णिच् when meaning 'to mix' 'to reflect'. The word avakalkana means according to some 'to mix' others say it means 'to think' Pre. भावयति । The Bhuâdi form is भवति ।

कृपेश्च २०८ ।

कल्पयति ।

308 √kripa This root also takes णिच् in the senses mentioned in the last Pre कल्पयति ।

आ स्वदः सकर्मकात् ।

स्वदिमभिव्याप्य सम्भवत् कर्मभ्य एव णिच् ।

Gana sutra —The affix णिच् comes after the following roots upto √svada inclusive when they take an object

Where there is a possibility of governing an objective case there these roots are Churâdi

Some explain this sûtra as 'The *root Svada preceded by* आ takes the affix णिच् when it is Transitive"

ग्रस २०९ ग्रहणे ।

ग्रासयति फलम् ।

209 √grasa to eat, devour. As ग्रासयति फलम् 'he eats the fruit'

पुष २१० धारणे ।

पोषयत्याभरणम् ।

210 √pusha, to put up or wear. As पोषयत्याभरणम् 'She wears ornaments'. Other forms are पोषति (Bhuâdi), पुष्यति (Divâdi) पुष्णाति kryâdi).

दल २११ विदारणे ।

दालयति ।

211. √dala to split, to tear. As दालयति।

पट २१२ पुट २१३ लुट २१४ तुजि २१५ मिजि २१६ पिजि २१७ लुजि २१८ भजि २१९ लघि २२० त्रसि २२१ पिसि २२२ कुसि २२३ दशि २२४ कुशि २२५ घट २२६ घटि २२७ बृहि २२८ बर्ह २२९ बल्ह २३० गुप २३१ धूप २३२ विच्छ २३३ चीव २३४ पुथ २३५ लोकृ २३६ लोचृ २३७ णद २३८ कुप २३९ तर्क २४० वृतु २४१ वृधु २४२ भाषार्थाः।

पाटयति। पोटयति। लोटयति। तुञ्जयति। तुञ्जति। एव परेषाम्। घाटयति। घण्टयति।

212. √pata, 213. √puta, 214. √lata, 215. √tuji 216 √miji, 217 √piji, 218 √luji, 219 bhaji, 220 √laghi, 221 √trasi, 222 √pisi, 223 kusi, 224 √dasi, 225 √kusi, 226 √ghata, 227 √ghati, 228 √brihi, 229 √barha, 230 balha, 231 √gupa, 232 dhûpa, 233 √richchha, 234 √chîva, 235 √putha, 236 √lokri, 237 √lochri, 238 √ṇada, 239 √kupa, 240 tarka, 241 √vritu, 242, √vridhu, to speak, to shine

Thus पाटयति, पोटयति, लोटयति, तुञ्जयति, or तुञ्जति। So also of the rest घटयति, घण्टयति।

In forming the Aorist of लोकृ and लोचृ there is no shortening by the following:—

√२५७२। नाग्लोपिशास्वृदिताम्। ७।४।२।

णिच्यग्लोपिनः शास्तेर्ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्तयति। वर्धयति। ऋदित्वाद्वर्तति। वर्धति।

2572. The shortening of the penultimate of the stem, before the causative affix, in the reduplicate-Aorist, does not take place, when it is a (Denominative) stem, which has lost a simple (end vowel of the Nominal-stem), before the Causative sign and also not, when it is the verb शास्, or a root which has an indicatory ऋ॥

Note.—The word अग्लोपिन् means literally a stem, in which a simple vowel (अक् pratyâhâra) or a portion containing an अक् vowel has been dropped. As the final vowels of Denominative stems are so elided before the Causative sign णि, the sûtra has been translated accordingly Thus अममालत्=मालामाख्यत्; अममालत्=मातरमाख्यत्, अरराजत्=राजानमतिक्रान्तवान्, अलुलोमत्=लोमान्यनुमृष्टवान्॥ Where a simple अक vowel *alone* is elided, as in the case of माला, there the elided आ being sthânivat, would prevent the shortening, the आ of मा not being then considered penultimate. So that अग्लोपिन् could be spared from the sûtra, since the sthânivad-bhâva would prevent shortening. But where an अक् vowel plus a consonant is dropped, as in राजन् and लोमन्, there the sthânivad-bhâva does not apply (I. 1. 57), hence the necessity of employing the term अग्लोपिन् in the sûtra.

Similarly अयथायद् from याथ्, and अवसायद् from वस्, ... from ...
and अलुलोकद् from लोकृ। See III. 1. 21 and 25.

Thus अलुलोकद् and अलुलोचद्। So also वर्हयति। वर्हति। As ... is read above with an indicatory उ, the णिच् is optional and so we have ...।

212 √pata Pre पाटयति। But पटति in kathâdi and ... in Bhuâdi.

213. √puta Pre. पोटयति। But पुटति in kathâdi and पुटति in Tudâdi.

214 √luta Pre. लोटयति। But लोटति (Bhuâdi No. ...) and लुटति (Divâdi No 113). So also लोटते and लुटति।

215. √tuji Pre. तुञ्जयति। तुञ्जति। But तोजति (Bhuâdi).

216 √miji Pre मिञ्जयति। मिञ्जति।

217. √piji Pre. पिञ्जयति। पिञ्जति। But पिङ्क्ते। (Adâdi).

218. √luji Pre लुञ्जयति।

219 √bhaji Pre. भञ्जयति। But भजति। (Bhuâdi) भनक्ति (Rudhâdi), and भाजयति already gone before

220. √laghi. Pre. लङ्घयति। लङ्घति।

221. √trasi Pre त्रंसयति। त्रसति। But त्रस्यति and त्रसति (Divâdi).

222. √pisi Pre पिंसयति। पिंसति। But पेसति ... and पेसति Bhuâdi

223. √kusi. Pre. कुंसयति। कुंसति। Noun कुंसः।

224 √dasi. Pre दंसयति। दंसति। But दसति ... in Bhuâdi

225 √kusi Pre कुंसयति। कुंसति।

226 √ghata. Pre घाटयति। It means 'to ...' also. Its repetition here is because of the difference of meaning. While घटते is ghatâdi

227. √ghati Pre. घण्टयति। घण्टति। Noun घण्टा।

228 √vrihi. Pre. बृंहयति। बृंहति। The Bhuâdi is बृंहति।

229. √varha. Pre. वर्हयति।

230. √valha Pre. वल्हयति।

231. √gupa Pre गोपयति। But गोपायति 'to protect' is Bhuâdi, गुप्यति is Divadi

232 √dhûpa Pre. धूपयति। But धूपति is Tudâdi.

233 √vichchha Pre विच्छयति। But विच्छयति is Tudâdi.

234 √chîva Pre चीवयति।

235. √putha Pre पोथयति। But पुथ्यति 'to injure' is Divâdi, and पुन्थति is Bhuâdi

236. √lokri. Pre. लोकयति। But लोकते 'to see' is Bhuâdi, Aor. अलुलोकद्। S 2572.

237. √lochri Pre. लोचयति। But लोचते 'to see' is Bhuâdi. Aor. अलुलोचद्।

238. √nada Pre. नादयति। But नदति 'to sound' is Bhuâdi.

239. √kupa. Pre. कोपयति। But कुप्यति 'to be angry' is ...

240. √tarka. It means 'to reason' 'to argue', 'to draw inferences,' also. Pre. तर्कयति ।

241. √vritu. Pre. वर्त्तयति । वर्तति because of the indicatory उ । वृत्यते is Divâdi. वर्तते is Bhuâdi.

242. √vridhu. Pre. वर्धयति । वर्धति for the same reason.

रुठ २४३ लजि २४४ अजि २४५ दसि २४६ भृशि २४७ रुशि २४८ शीक २४९ रुसि २४८ क । नट २५० पुटि २५१ जुचि (जिवि) २५२ जि २५२ क । - चि २५२ ख । रघि २५३ लघि २५४ अहि २५५ रहि २५६ महि २५७ च ।

243. √rutha to 257 √mahi cha, to speak. These fifteen roots are given by Kâśyapa and Swâmî.

Pre. रोठयति । But स्तठति 'he steals' is Bhuâdi and रोठते 'he re-acts.'

244. √laji. Pre. लञ्जयति । लञ्जति । compare लजति-लञ्जति 'he parches' in the Bhuâdi No. S. 257, 258) and लाजति-लाञ्जति । (Bhuâdi Nos. 259 & 260) लजते is Tudâdi No, 10. and लञ्जयति 'he manifests' is kathâdi.

245. √aji. Pre. अञ्जयति । अञ्जति । But अनक्ति in Rudhâdi.

246. √dasi. Pre. दंसयति । दंसति ।

247. √bhriśi. Pre. भ्रंशयति or भ्रंशति । But भर्शति (Bhuâdi) and भ्रश्यति (Div. 115.) 'he falls.'

248. √ruśi. Pre. रुंशयति । रुंशति ।

248 (a). रुसि, 249. √śîka.

Pre. रुंसयति । रुंसति । शीकयति । But शीकति-ते 'he sprinkles' is Bhuâdi No. 75.

250. √naṭa. Pre. नाटयति । When meaning to dance, it is also Churâdi as taught in No 12. नटति is Ghaṭâdi.

251. √puṭi. Pre. पुण्टयति । But पोटते 'he changes' is Bhuâdi.

252. √juchi. Pre. जुञ्चयति or जुञ्चति ।

253. √raghi Pre. रङ्घयति or रङ्घति । See also Bhuâdi No. 107, for रङ्घते । 'he moves'.

254. √laghi. Pre. लङ्घयति or लङ्घति ।

255. √ahi.

Pre. अंहयति or अंहति । But अंहते 'he moves' is Bhuâdi No 660.

256. √rahi. Pre. रंहयति or रंहति । But रहयति 'he abandons' is kathâdi.

257. √mahi. Pre. मंहयति or मंहति । But महयति 'he honors' is kathâdi महति is Bhuâdi No. 760 मंहते is No. 665.

लडि २५८ तड २५९ नल २६० च ।

258. √ladi. 259. √tada. 260. √nala cha, to speak.

Pre. लण्डयति or लण्डति । But लाडयति 'to fondle,' and लडति also ओलण्डति । But तण्डति and तण्डते (Bhuâdi Nos. 374 & 293); and तडति is Tudâdi No. 92 नालयति or नलयति । But नलति is Bhuâdi No. 691.

पुरी २६१ आप्यायने ।

ईदित्वं निष्ठायामिड्निषेधाय । अत एव णिज्वा ।

पूरयति-पूरति ।

261. √pûrî, to fulfil, satisfy. The long indicatory ई is for the sake of prohibiting the augment इट् । Therefore the णिच् is optional.

Pre. पूरयति or पूरति । But पूर्यते in the Divâdi No 43.

रुज २६२ हिंसायाम् ।

262 √ruja, to hurt kill

Pre रोजयति । But रुजति 'he breaks' is Tudâdi No 123

ष्वद २६३ आस्वादने।

'स्वाद' इत्येके । असिष्वदत् । दीर्घस्य स्वदोपदेशत्वात् । असिस्वदत् ।

263. √shvada, to taste Some read it as √shvâda. The aorist of ष्वद् is असिष्वदत But of the long स्वाद it is असिस्वदत् । The स is not changed to ष because the root is exhibited as स्वाद and not as ष्वाद ।

Pre स्वादयति । But the Bhuâdi form is स्वादते or स्वदते । Aor. असिष्वदत् ।

आधृषाद्वा ।

इत ऊर्ध्वं विभाषित णिचो धृषधातुमभिव्याप्य ।

Gana Sutra —The roots upto dhrisha inclusive are optionally conjugated in णिच् । (No 306)

युज २६४ पृच २६५ संयमने ।

योजयति-योजति । अयौक्षीत् । पर्चयति-पर्चति । पर्चिता । अपर्चीत् ।

264 √yuja 265 √pricha to join, unite

Pre योजयति । or योजति । I Fut योक्ता । Aor अयौक्षीत् ।

265 √pricha Pre पर्चयति or पर्चति । I Fut पर्चिता । Aor अपर्चीत् ।

अर्च २६६ पूजायाम् ।

266 √archa, to worship Pre अर्चयति or अर्चति ।

षह २६७ मर्षणे ।

साहयति । 'स स्वाय नागः सहति कलभेभ्यः परिभवम्' ।

267. √shaha to cause to bear or suffer

Pre साहयति or सहति or सहते । This ought not to be read here according to the author of the vritti. However the form सहति is valid, as we find it in the following sentence स स्वाय नागः सहति कलभेभ्यः परिभवम् ।

ईर २६८ क्षेपे ।

268 √îra, to cast, (to go) Pre. ईरयति or ईरति । But ईर्ते is *Adâdi*

ली २६९ द्रवीकरणे ।

लाययति-लयति । लेता ।

269 √lî, to melt Pre. लाययति or लयति । But लीयते is Divâdi No 31, and लिनाति is kryâdi No. 31, I Fut लेता ।

वृजी २७० वर्जने ।

वर्जयति-वर्जति ।

270 √vrijî, to shun, avoid. The long ई indicates the absence of the augment इट् in the Nishthâ.

Pre. वर्जयति or वर्जति । But वृक्ते is Adâdi No 19, and वृङ्क्ते and वृणक्ति is Rudhâdi No. 24, I Fut. वर्जिता ।

वृञ् २७१ आवरणे ।

वारयति-वरति-वरते । वरिता-वरीता ।

271. √vriñ, to cover

Pre वारयति or वरति । A वरते । cf वृणोति, वृणुते of Svâdi No 8, and वृणीते of kryâdi No 20, I Fut वरिता or वरीता ।

जॄ २७२ वयोहानौ ।

जारयति-जरति । जरिता-जरीता ।

272. √jri, to grow old Pre जारयति or जरति । I Fut जरिता or जरीता ।

ज्रि २७२ क । च ।

ज्रापयति-ज्रयति । ज्रेता ।

272A √jri cha, to grow old Pre. ज्रापयति or ज्रयति । I Fut. ज्रेता ।

रिच २७३ वियोजनसंपर्चनयोः

रेचयति-रेचति । रेक्ता ।

273 √richa, 1. to separate, 2 to unite Pre रेचयति or रेचति । I Fut रेक्ता ।

शिष २७४ असर्वोपयोगे ।

शेषयति-शेषति । शेष्टा । अशिषत् । अयं विपूर्वोऽतिशये ।

274 √sisha to leave as remainder spare It is generally preceded by the preposition वि meaning to excel Thus विशेषयति or विशेषति ।

Pre. शेषयति or शेषति । I Fut. शेष्टा । Aor अशिषत् ।

तप २७५ दाहे ।

तापयति-तपति । तप्ता ।

275 √tapa to burn Pre तापयति or तपति । I Fut तप्ता ।

तृप २७६ तृप्तौ ।

'सन्दीपने' इत्येके । तर्पयति-तर्पति । तर्पिता ।

276 √tripa, to please Kshirasvâmi says it means सन्दीपने 'to kindle' This root is not Anit The तृप् of the Divâdi class is Anit.

Pre तर्पयति or तर्पति । But तृप्यति is Divâdi No 86, and तृपति is Tudâdi No 26, I Fut तर्पिता ।

छृदी २७७ संदीपने ।

छर्दयति-छर्दति । छर्दिता । छर्दिष्यति । 'सेऽसिचि-' (२५०६) इति विकल्पो न । णाश्चर्यास्य चौरादिकस्यैव ग्रहणात् । 'चप छृप दृप संदीपने' इत्येके । चर्पयति । छर्पयति ।

277. √chhṛidi, to kindle. The root छृद mentioned in sûtra VII. 2. 57, S. 2506 does not refer to the present root, but to the Rudhâdi root, because the other roots read along with it there belong to that class, consequently there is no optional adding of the augment इट्।

Some read here the following three additional roots: √chṛipa as चर्पयति; √chhṛipa as छर्पयति; and √dṛipa, as दर्पयति।

Pre. छर्दयति or छर्दति। But छृन्ते, छृणत्ति is Rudhâdi No. 8, I Fut. छर्दिता। II Fut. छर्दिष्यति। Past Parti. Pass. छृण्णः। Act. छृण्णवान्।

दृभी २७८ भये।

दर्भयति-दर्भति। दर्भिता।

278. √dṛibhî, to fear.

Pre. दर्भयति *or* दर्भति। I Fut. दर्भिता। Past Parti Pass दृब्धः।

दृभ २७९ संदर्भे।

अयं तुदादावीदित्।

279. √dṛibha, to tie, fasten, string together. This root is ईदित् in the Tudâdi class It is conjugated like the last, but *as it has no indicatory* long ई, the nishthâ is सेट्।

Pre. दर्भयति or दर्भति। The Tudâdi form is दृभति। Past Parti. Pass. दर्भितः।

श्रथ २८० मोक्षणे।

'हिंसायाम्' इत्येके।

280 √śratha, to untie, loosen, (to kill). Some say it means 'to hurt' or to injure'. Pre. श्रथयति or श्रथति। See श्राथयति No. 13, for 'he endeavours'; श्रथयति। 'he is weak' in Kathâdi.

मी २८१ गतौ।

माययति-मयति। मेता।

281. √mî, to go, move.

Pre. माययति or मयति। cf. मीनीते, मिनाति of the kryâdi No. 4; मिनोति, मिनुते of the Svâdi No. 4, I Fut मेता। Desid. मिमीषति।

ग्रन्थ २८२ बन्धने।

ग्रन्थयति-ग्रन्थति।

282. √gratha, to fasten, tie. Pre. ग्रन्थयति or ग्रन्थति।

शीक २८३ आमर्षणे।

283. √śîka, to be patient. *Pre.* शीकयति or शीकति। cf. शीकते 'he sprinkles' Bhuâdi No 75. I Fut. शीकिता।

चीक २८४ च।

284. √chîka cha, to endure, bear, suffer.

Pre. चीकयति or चीकति। I Fut. चीकिता।

अर्द २८५ हिंसायाम् ।

स्वरितेत् । अर्दयति-अर्दति-अर्दते ।

285 √arda, to injure, hurt, kill It is Svaritet.

Pre अर्दयति or अर्दति or अर्दते । cf Bhuadi No 56

हिसि २८६ हिंसायाम् ।

हिंसयति-हिंसति । 'हिनस्ति' इति श्नमि गतम् ।

286. √hisi, to hurt, injure, kill. The णिच् would have been optional by the very fact that it has an indicatory इ। Its inclusion in the चुरादि list appears superfluous

Pre. हिंसयति or हिंसति । But हिनस्ति is Rudhadi No. 19

अर्ह २८७ पूजायाम् ।

287. √arha, to worship. Pre. अर्हयति cf. No. 192 or । अर्हति ।

आङः षद २८८ पद्यर्थे ।

आसादयति-आसीदति । 'पाघ्रा-' (२३६०) इति सीदादेशः । आसत्ता । आसात्सीत् ।

288. √âṅah shada, to approach, go to, reach The √shada preceded by the preposition आ is optionally conjugated in the Churâdi class

Pre. आसादयति or आसीदति। The सीद is substituted for सद by VII 3. 78 S 2360 in the Bhuadi See No 907, I Fut आसत्ता । Aor आसात्सीत् ।

शुन्ध २८९ शौचकर्मणि ।

शुन्धिता । अशुन्धीत् । अशुन्धिषाम् ।

289 √sundha, to be purified or cleansed, to cleanse

Pre शुन्धयति or शुन्धति । cf Bhuâdi No 74, which is however intransitive I Fut. शुन्धिता । Aor. अशुन्धीत् । अशुन्धिषाम् ।

छद २९० अपवारणे ।

स्वरितेत् ।

290 √chhada, to cover It is svaritet.

Pre छादयति *or* छदति *or* छदते । *But* छदयति *is ghatâdi*

जुष २९१ परितर्कणे ।

परितर्कणमूहो हिंसा वा । 'परितर्पणे' इत्यन्ये । परितर्पणं परितृप्तिक्रिया । जोषयति-जोषति । प्रीतिसेवनयोर्'रुप्त' इति तुदादौ ।

291. √jusha, to hurt, to be satisfied The word paritarkana means 'to reason' 'to injure' Kshîra Swâmi says the root means 'to be satisfied'. It is conjugated in the Tudâdi also See No. 8

Pre जोषयति or जोषति ।

धूञ् २९२ कम्पने ।

वा विस्तरचिकृत्य । "धूञ्प्रीञोर्नुग्वक्तव्यः" । धूनयति-धवति-धवते । केचित्तु 'धूञ्प्रीञोः-' इति पठित्वा प्रीञातिवाहचर्याद्धुनातेरेव नुकमाहुः । धावयति । अयं स्वादौ क्र्यादौ तुदादौ च । स्वादौ ह्रस्वश्च । तथा च कविरहस्ये—

'धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम् ।
वायुर्विधूनयति चम्पकपुष्परेणून्यत्कानने धवति चन्दनमञ्जरीश्च ॥'

292. √dhûñ, *to shake, agitate, cause to move.* Under the rules applying to णिच्, we find the following vârtika under sûtra VII. 3. 37. S. 2585, in which the anuvṛitti of णौ "when णि follows," is current from VII 3. 36 S. 2570:—

Vârtika.—It should be stated that the roots dhûñ and prîñ take the augment नुक् when the affix णि follows.

Thus धूनयति or धवति or धवते। Some read this vârtika as धूञ्प्रीञोर्नुग्वक्तव्यः। *and because* धूञ् *is found in the company of* प्रीणाति, they would confine the augment नुक् to the धू of the kryâdi *class and not to the Churâdi* धू. According to them, it is conjugated as धावयति।

This root is Svâdi No. 9; kryâdi No. 17; and Tudâdi No. 105. The ऊ is short in the Svâdi. Thus we find in the above verse of Kavirahasya all the different conjugations of the √dhû.

Pre. धूनयति *or* धावयति *or* धवते।

प्रीञ् २९३ तर्पणे।

प्रीणयति। "धूञ्प्रीञोः–" इति हरदत्तोक्तपाठे तु। प्राययति-प्रयति-प्रयते।

293. √prîñ, to please, satisfy. If we apply the vârtika given under the last root, then we get नुक् augment, and the form will be प्रीणयति। But if we follow the opinion of Haradatta, who reads the vârtika as धूञ्प्रीञोः &c., then there will be no नुक् augment; and the form will be प्राययति।

Pre. प्रीणयति or प्राययति। Without, णिच्, प्रयति or प्रयते।

श्रन्थ २९४ ग्रन्थ २९४ क। संदर्भे।

294. √śrantha, 294A. √grantha, to fasten, tie.

Pre. श्रन्थयति or ग्रन्थयति or श्रन्थति, ग्रन्थति। cf. श्रथ्नाति, ग्रथ्नाति Kryâdi No. 41; श्रन्थते, ग्रन्थते Bhuadi.

आप्लृ २९५ लम्भने।

आपयति-आपति। आपत्। आप्ता। स्वरितेदयमित्येके। आपते।

295. √âplṛi, *to obtain.* Some say this root is svaritet.

Pre आपयति or आपति or आपते। I Fut. आप्ता। Aor. आपत् with अङ् because the root has an indicatory लृ।

तनु २९६ श्रद्धोपकरणयोः।

'उपसर्गाच्च दैर्घ्ये'। तानयति। वितानयति-तनति। वितनति। 'चन श्रद्धोपहननयोः' इत्येके। चानयति-चनति।

296. √tanu, 1. to confide, trust, place confidence in. 2. to help, assist, aid. When preceded by an upasarga it means to extend. Some read at as √chana to trust,' 'to kill.' Pre. तानयति। वितानयति।, तनति। वितनति। चानयति। चनति। cf. चनयति। of the Ghatâdi.

वद २९७ संदेशवचने।

वादयति। स्वरितेत्। वदति-वदते। अनुदात्तेदित्येके। अवदत्। अवदिष्ट। ववदे। वदात्।

297. √vada, to cause to speak or say; to cause to sound, play on a musical instrument. This root is svaritet. Some say it is anudâttet.

Pre. वादयति or वदति । A. वदते । Per. ववाद । A. ववदे । ववदतुः । ववदिथ । Bene. वद्यात् ।

वच २९८ परिभाषणे ।

वाचयति-वचति । वक्ता । अवाचीत् ।

298. √vacha, to speak. Pre वाचयति or वचति । I Fut. वक्ता । Aor. अवाचीत् ।

मान २९९ पूजायाम् ।

मानयति-मानति । मानिता । विचारणे तु भौवादिको नित्यसन्नन्तः । स्तम्भे मानयते । इत्याकुस्मीयाः । मन्यत इति दिवादौ । मनुत इति तनादौ च ।

299. √mâna, to honour, to worship. When it means 'to reflect,' it is Bhuâdi and invariably followed by सन् । When meaning 'to stop,' it is read in the Akusmiya class, and we have मानयते । In the Divâdi we have मन्यते । (No. 67.); in the Tanâdi मनुते (No. 9).

Pre. मानयति or मानति । I Fut मानिता ।

भू ३०० प्राप्तावात्मनेपदी ।

भावयते-भवते । णिच्संनियोगेनैवात्मनेपदमित्येके । भवति ।

300. √bhû, to obtain, gain. It is Atmanepadi. Some say it is Atmanepadi only then when णिच् is joined to it. Otherwise it is Parasmaipadi; as भवति and never भवते ।

Pre. भावयते or भवते । According to others भवति । I Fut, भविता ।

गर्ह ३०१ विनिन्दने ।

301. √garha, to blame, censure, reproach.

Pre. गर्हयति or गर्हति । cf. Bhuâdi गर्हते No. 667.

मार्ग ३०२ अन्वेषणे ।

802. √mârga, to seek. Pre, मार्गयति । But मृगयते is kathâdi. I Fut. मार्गिता । Pre. Parti Atmane मार्गेषः ।

कठि ३०३ शोके ।

उत्पूर्वोऽयमुत्कण्ठायाम् । कण्ठत इत्यात्मनेपदी गतः ।

303. √kaṭhi, to mourn, grieve for. When preceded by उत् it means 'to be anxious'. कण्ठते is Atmanepadi already taught before Pre. कण्ठयति or कण्ठति । But कण्ठते is Bhuâdi No 283, and कठति (Bhûadi NO. 350). I Fut. कण्ठिता ।

मृजू ३०४ शौचालंकारयोः ।

मार्जयति-मार्जति । मार्जिता-मार्ष्टा ।

304. √mṛjû, 1. to wipe or wash off, cleanse. 2. to deck, adorn. The इट् is optional because of the indicatory ऊ ।

Pre. मार्जयति or मार्जति । I Fut. मार्जिता or मार्ष्टा । Past Parti. Pass. मृष्टः ।

मृष ३०५ तितिक्षायाम् ।

स्वरितेत् । मर्षयति-मर्षति-मर्षते । मृष्यति-मृष्यते इति दिवादौ । सेचने मर्षति ।

305 √mrisha to suffer, endure, put up with

Pre मर्षयति or मर्षति । A मर्षते । But मृष्यते or ति is Divâdi No 55, and मर्षति 'he sprinkles is Bhuâdi No 739.

धृष ३०६ प्रसहने ।

धर्षयति-धर्षति । इरित्यायुधीयाः ।

306 √dhrisha, to assail attack, outrage According to Śâkatâyana the root has an indicatory इर । The Nishthâ is therefore धृष्टः । Some read the root धष बन्धने here Pre धर्षयति । I Fut धर्षिता or धृषिता ।

Here end the Yujâdi or Adhrishiya roots

अथादन्ताः ।

Sub section *Kathâdi Roots* —Now all the roots taught hereafter end in a short अ ।

कथ ३०७ वाक्यप्रबन्धे ।

अल्लोपस्य स्थानिवद्भावान्न वृद्धिः । कथयति । अग्लोपित्वान्न दीर्घसन्वद्भावौ । अचकथत् ।

307 √katha to tell, narrate The final अ in कथ is part of the root and not indicatory The result of which is that when this अ is elided, the substitute Zero becomes sthânivat and prevents vriddhi Thus कथ + णिच् + शप् + ति = कथ् + णिच् + शप् + ति (the अ is elided by VI 4 48 S. 2308) This elided अ becomes sthânivat for the purposes of purvaviddhi, under I 1 57 S 50, the substitution of vriddhi for the penultimate by VII 2. 116 S 2282, does not take place for the अ in क is not penultimate Hence we get कथयति and not काथयति ।

Moreover as there is the elision of the vowel अ of the root कथ by VI. 4 48 S 2308 the root is अग्लोपिन् and therefore in the Aorist there is neither the lengthening by VII 4 94 S 2318, nor the San vadbhâva, taught in VII 4 93. S 2316 We have अचकथत् ।

Other uses of making the final अ a portion of the root will be mentioned later on as occasion requires Pre कथयति । Aor अचकथत् ।

वर ३०८ ईप्सायाम् ।

वरयति । वारयतीति गतम् ।

308 √vara to ask for choose

Pre वरयति । While वारयति has been taught before See No 271.

गण ३०९ सङ्ख्याने ।

गणयति ।

309 √gana to count number, enumerate In forming the aorist a long ई is optionally substituted for the अ of ग by the following sûtra

२५७३ । ई च गणः । ७ । ४ । ९७ ।

गणेरभ्यासस्य ईत्स्यात्चङ्परे णौ । चादत् । अजगणत्–अजीगणत् ।

2573. In the Reduplicate Aorist of the णिच् ending roots ई is substituted optionally for the vowel of the reduplicate in गण् ॥

As अजीगणत् or अजगणत् ॥ गण is a root which ends in अ, and this अ being elided by VI. 4. 48 before the affix णि, the rule VII. 4. 93, does not apply to it, because there is an ak-lopa here, so in the other alternative, it has its natural अ ।

Pre. गणयति । Aor. अजीगणत् or अजगणत् । Nouns :—गणिका । गाणिक्यम् ।

शठ ३१० श्वठ ३१० क । सम्यगवभाषणे ।

310. √śatha, 310A. √śvatha, to speak ill of, to speak well or elegantly. Some read असंभाषणे ।

Pre. शठयति । श्वठयति । But शाठयति and श्वाठयति in Gatyâdi, and शाठयते in âkusmiya; and शठति is Bhuâdi No. 321.

पट ३११ वट ३११ क । ग्रन्थे ।

311. √pata, 311A. √vata, to string, or weave

Pre. पटयति । But पाटयति 'he speaks' has been taught before. पटति 'he moves' is Bhuâdi No. 318. So also वटयति । But Bhuâdi is वटति No. 322, and the causative of it is वाटयति 'he causes to surround' वटयति is ghatâdi No 816.

रह ३१२ त्यागे ।

अररहत् ।

312. √raha, to quit, leave, abandon. Pre. रहयति । But रहति Bhuâdi No. 767; and रहति 'he goes' No. 768. Aor. अररहत् ।

स्तन ३१३ गदी ३१४ देवशब्दे ।

स्तनयति । गदयति । अजगदत् ।

313. √stana 314 √gadî, to thunder, roar loudly. The long ई is the sign of the dual case in सन्नपदी ।

Pre. स्तनयति । Aor अतस्तनत् । Desid. तिस्तनयिषति । स is not changed to ष as the root is not षोपदेश । Noun स्तनयित्नु ।

314 √gadî. Pre. गदयति । But गदति Bhuâdi No. 52.

पत ३१५ गतौ वाणिजन्तः ।

णाद्न्त इत्येके । अदन्ते पतयति–पतति । पतांचकार । अपतीत् । द्वितीये पातयति । अपीपतत् ।

Gana Sutra :—Optionally the verb √pata takes णिच् when meaning 'to go'. Some say the option refers not to णिच् but to its being adanta (ending in a short अ) According to the first view we have पतयति or पतति । Per. पतयांचकार । Aor. अपतीत् । According to the second view we have Pre. पातयति । Aor अपीपतत् ।

315 √pata, 'to go'.

Pre पतयति or पतति । I पाततति or पतयति । Per. पतायचकार । The Perfect is periphrastic, as the root contains more than *one* vowel (*i e., pata*) Not so the Bhuâdi √pata No 898 But if वा refers to अदन्त, then the Per. is पतया चकार । Aor. अपतीत् or अपीपतत् । Noun :—पतयालुः ।

पष ३१६ अनुपसर्गात् ।

गतःविरपेय । पषयति ।

316 √pasha, when not preceded by a preposition, means 'to go,' and takes णिच् ।

Pre पषयति । But it is Bhuâdi when preceded by an upasarga, as प्रपषति । The anuvritti of वा is taken here by some According to them the *root is optionally* अदन्त । *Thus we have* पाषयति *also.*

स्वर ३१७ आक्षेपे ।

स्वरयति ।

317 *√svara, to find fault, blame, reprove, censure.*

Pre स्वरयति । But स्वरति 'he makes sound' is Bhuâdi

रच ३१८ प्रतियत्ने ।

रचयति ।

318 √racha, to arrange, prepare, make ready ' Pre रचयति ।

कल ३१९ गतौ सङ्ख्यानेच ।

319 √kala to go, 2 to enumerate, calculate. Pre कलयति । But कालयति 'He throws is No 64, and कलते is Bhuâdi No 526, Noun —कलिः 'the period or unit of astronomical calculation '

चह ३२० परिकल्कने ।

परिकल्कनं दम्भः शाठ्य च ।

320 √chaha, to be proud or haughty The word parikalkana means pride and deceit Pre चहयति । See the section Ghatâdi for this root The Bhuâdi is चहति । No. 765.

मह ३२१ पूजायाम् ।

महयति । महतीति अपि मतम् ।

321. √maha, to honor, worship Pre. महयति । But महति is Bhuâdi No 766

सार ३२२ कृप ३२३ श्रथ ३२४ दौर्बल्ये ।

सारयति । कृपयति । श्रथयति ।

322. √sâra, 323. √kripa 324 √sratha, to be weak, Pre सारयति ।

323 √kripa. Pre. कृपयति But cf. कल्पयति from कृपूसामर्थ्ये (No I 779) and कल्पते from Bhuâdi No 799

324 √sratha

Pre. श्रथयति । But श्राथयति 'He *tries*' is No X' 13, and श्राथयति ' He releases' is No X 282, while श्रथति is âdhrishîya

स्पृह ३२५ ईप्सायाम् ।

325 √spriha, to desire Pre स्पृहयति । Noun —स्पृहयालुः ।

भाम ३२६ क्रोधे ।

अबभामत् ।

326 √bhâma, to be angry

Pre. भामयति । But भामते is Bhuâdi No 468 Aor अबभामत् ।

सूच ३२७ पैशुन्ये ।

सूचयति । अषोपदेशत्वान्न षः । असूसुचत् ।

327. √sûcha, to trace out spy, ascertain

Pre सूचयति । Aor असूसुचत् । The स is not changed to ष, as the root is not षोपदेश । Inten सोसूच्यते । स not changed to ष ।

खेट ३२८ भक्षणे ।

तृतीयान्त इत्येके । खोट इत्यन्ये ।

328 √kheta to eat Some read it as खोट √khota and √kheda Pre खेटयति । खोटयति । The Bhuâdi form is खेटति । Noun —चाखेटना ।

क्षोट ३२९ क्षेपे ।

329 √kshota, to throw Pre क्षोटयति ।

गोम ३३० उपलेपने ।

अजुगोमत् ।

330 √goma to plaster with cowdung Pre गोमयति । Aor अजुगोमत् ।

कुमार ३३१ क्रीडायाम् ।

अचुकुमारत् ।

331 √kumâra to play Pre कुमारयति । Aor अचुकुमारत् ।

शील ३३२ उपधारणे ।

उपधारणमभ्यासः ।

332 √sîla to study practise repeatedly The word upadhârana means 'practice Pre शीलयति । But शीलति he meditates is Bhuâdi No 556 Past Parti. Pass शीलितः ।

साम ३३३ सान्त्वप्रयोगे ।

अससामत् । साम सान्त्वने इत्यसौ तस्य तु असीषमत् ।

333 √sâma to appease conciliate, soothe

Pre सामयति । Aor अससामत् । But असीषमत् from the root साम सान्त्वने which has been taught before Quere No where before has the root साम सान्त्वने been taught in the current texts of the Siddhânta Kaumudi or Dhâtupâtha Mâdhava also refers to साम सान्त्वने here but no where has he given it separately Others say that the root सान्त्व सामप्रयोगे No 33, should be read as two roots (1) सान्त्व (2) साम, and प्रयोगे is their meaning

वेल ३३४ कालोपदेशे ।

वेलयति । 'काल' इति पृथग्धातुरित्येके । कालयति ।

334. √vela, to count the time. Some say काल is a separate root; and not the meaning of वेला । Pre. वेलयति । कालयति । Noun :—वेला ।

पल्यूल ३३५ लवनपवनयोः ।

335. √palyûla, 'to salt,' 'to purify.' The word palyula means 'soap.' As in the Taittariya Samhita नास्य पल्यूलनेन वासः पल्यूलयेयुः । Pre. पल्यूलयति ।

वात ३३६ सुखसेवनयोः ।

'गतिसुखसेवनेषु' इत्येके । वातयति । अववातत् ।

336. √vâta, 1. to go: 2, to make happy; 3. to serve.
Pre. वातयति । Aor. अववातत् ।

गवेष ३३७ मार्गणे ।

अजगवेषत् ।

337. √gavesha, to seek, search, to hurt Pre. गवेषयति । Aor. अजगवेषत् ।

वास ३३८ उपसेवायाम् ।

338. √vâsa, to scent, perfume, incense, fumigate, make fragrant; to steep, infuse; to spice, season Pre वासयति । Compare वस्ते AdAdi No. 13; and वस्यति 'he stops' Divâdi No. 105, Noun :—वासना ।

निवास ३३९ आच्छादने ।

अनिनिवासत् ।

339. √nivâsa, to dress Pre. निवासयति । Aor. अनिनिवासत् ।

भाज ३४० पृथक्कर्मणि ।

340. √bhâja, to divide, distribute Pre. विभाजयति ।

सभाज ३४१ प्रीतिदर्शनयोः ।

'प्रीतिसेवनयोः' इत्यन्ये । सभाजयति ।

341 √sabhâja, 1. to please, 2. to show According to others it means 'to please' and "to serve.' Pre सभाजयति ।

ऊन ३४२ परिहाणे ।

ऊनयति । 'ओः पुयण्ज–' (२५७७) इति सूत्रे 'पयपोः' इति वक्तव्ये वर्णमध्यादकारउकारग्रहो लिङ्गं 'णिचि अच आदेशो न स्याद्द्वित्वे कार्ये' इति । 'यत्र द्वित्वकारणभूतोत्तरखण्डस्यादोऽच् परक्रियायां परनिमित्तके रूपे याचयों लभ्यते तत्रैवायं निषेधः' । ज्ञापकस्य सजातीयापेक्षत्वात् । तेन 'अचिक्कीर्तत्' इति सिद्धम् । प्रकृते तु न शब्दस्य द्वित्वं तत्र ऊनस्तस्योऽल्लोपः । औननत् । भाववानूननत् ।

342 √ûna, to leave deficient or unfinished, to lessen, diminish. Pre. ऊनयति । Aor. अ + ऊनिनत् or औननत् । Noun :—न्यूनः ।

In forming its aorist, the syllable न is reduplicated in order to obtain the desired form औननत् which is done by first reduplicating the न and then

eliding the अ by force of the affix णिच्. Of course this is an unusual procedure, but in following the ordinary procedure the difficulty is this, if in अन्+णि+चङ् we elide the अ of न first and this we must do, because elision taught later should be applied first, then the only syllable that we can reduplicate will be नि, formed by न्+इ of णिच्, and the form would be आनिनत्। Nor can the sûtra द्विर्वचनेऽचि help us (whether we interpret that sûtra to mean that the elided अ is *sthânivat* for the purposes of reduplication or that the elision should not take place when there is reduplication yet to be done), because the affix णिच् does not cause reduplication and therefore द्विर्वचनेऽचि does not apply to it. To get out of this difficulty, we take the help of the *jnâpaka* of VII. 4. 80 S. 2577, i.e., the existence of the following rule :—Though णिच् is not the cause of reduplication, yet the substitution to be caused by it does not take place or is to be considered as *sthânivat* for the purposes of reduplication.

The *jnâpaka* is arrived from the whole sûtra according to some. By VII. 4. 80 S. 2577, the following forms are evolved बिभावयिषति यियावयिषति, जिजावयिषति, from √bhû, √yu and √ju, by changing the उ of the reduplicate into इ. Now, had णिच् been allowed to operate first, there would have been no उ in the reduplicate, but the भू, यु and जु would have been followed by अ, and this अ would have been changed to इ by the ordinary rule of VII. 4. 79 S. 2317. It is only when णिच् is added that there is a possibility of उ, &c. *being followed by* अ, *otherwise not*.

would have made the sûtra ओः पयणोरपरयोः । His not having made it so, is the jñâpaka that णिच् does not produce its effect till the reduplication is not over For had it produced its effect first, then अबीभवत्, अपीपवत्, अरीरवत्, अलीलवत् अजीजवत् (the चङ् aorists of भू, पू, रु, लू and जु and चङ् is treated like सन्), could have been evolved by the ordinary rule of सन्यतः, and there would have been no उ in the reduplicate to operate upon by ओः पु &c. *Therefore the employment of पु instead of प, and of यण् pratyahâra* instead of य is useless hence we say this is ज्ञापकः of the above rule. The operation of the jñâpaka is formed where the sûtra ओः पुयण् &c. does not apply, as in बुभावयिषति उडुडावयिषति Aor औड्डवत् जुहावयिषति Aor अजूहवत्, ऊर्णुनावयिषति Aor. और्णुनवत् पुस्फारयिषति Aor. अपस्फुरत् ।

In the formation of the forms in लिट् or ardhdhatuka where guna is applicable the letter ऐ is changed to आ by the sûtra विभाषालीयतेः

ऊन+णिच्+चङ्+त=ऊन्+णिच्+चङ्+त=ऊनिनि+चङ्+त=ऊनिनत् with अट्= औनिनत् ।

When we elide the अ of ऊन before the णि and चङ्, because the rule of elision is subsequent to that of reduplication, and also because it is antaranga, then we get the stem ऊनि a root which begins with a vowel, and in its reduplication the sûtra अजादेर्द्वितीयस्य (VI 1. 2 S 2176) applies, and so नि is reduplicated, and we get the above form औनिनत् ।

But this is not the desired form the correct form is औननत् । This cannot be obtained without reduplicating न । Nor can you say that by applying the sûtra द्विर्वचनेऽचि (I 1. 59. S. 2243), the elided अ of ऊन will be sthânivat for the purposes of reduplication and that न will be reduplicated and not नि । That sûtra applies where the *cause* of reduplication *follows such elided* अ । *But here the* अ *is elided by* णिच् *which is not the* cause of reduplication, and so that sûtra does not help you Therefore our author says "In the sûtra VII 4. 80. 6. 2577 Pânini has used पु यण्, जि, while प, यण् would have been sufficient, the very fact of Pânini's using the word पु denoting the whole class of labials, the word यण् denoting the letters included in that pratyâhâra, and ज, indicates, that the substitution for the vowel does not take place before णिच् when reduplication is to be done

The meaning is this. The sûtra VII 2 74. S 2626 ordains the augment इट् to the affix सन् after the root पूङ्, and the sûtra VII 2 49 S. 2618 similarly ordains इट् to सन् after the root यु (यौति) Thus पू+इ+स+ति, and यु+इ+स+ति, here the affix इ causes guna, and we have पवि+सति, and सन् causes reduplication and by the sthânivadbhâva of द्विर्वचनेऽचि or the prohibition of substitution by the above vârtika, the reduplication will be of the stem ending in उ, thus पु पवि+सति, and युयवि+सति=पुपविषति and युयविषति । Now applies VII. 4 80 S. 2577, and उ is changed to इ । Therefore in order that the उ of the reduplicate may

be changed to इ, the word पु, यण् have not been used by Pâṇini, but पु, and यण्। Otherwise the forms पिपविषते or ० ति could not be formed, by substituting इ for the उ of the reduplicate.

Moreover, if you say that by using the terms पु and यण् the rule is made applicable to all the labials, as a class, and so also to all semi-vowels and that thus we get अबीभवत्, अपीपवत्, अरीरवत्, अलीलवत्, अजीजवत्, बिभावयिषति, पिपावयिषति, रिरावयिषति, लिलावयिषति। We reply that these forms could have been got without that sûtra. For after changing the ऊ to अव् or आव् as required, we reduplicate the stem ending in अव् or आव् and then for the अ of the reduplicate we substitute long ई, by VII. 4 79. S. 2317 and VII. 4 94. S 2318. Therefore the mention of पु यण् is useless in that sûtra.

Consequently we say that the sûtra indicates by implication the existence of the above maxim, that the substitution required by णिच् does not take place in the case of a vowel, when a reduplication is to take place. In other words, the substitution is postponed, till the reduplication is not effected. After that the substitution takes place.

Moreover this prohibition, that a substitution caused by णिच्, does not take place, is qualified by this further proviso: 'This prohibition applies only there, where by reduplication, the first vowel of the second portion of the stem next to the reduplicate is अ, whether original or obtained by the application of any rule."

The utility of the maxim obtained from the implication of ओः पुयण् जि &c. is illustrated in the following example. जु+णिच्+ऊट्+सन्+ति=जुजा-वयिषति। The चङ् aorist is अजुजवत्। Similarly "he acts like उङ्" is उवति। Here to the nominal base उङ् we add क्विप् under the vârtika to S. 2665, and we get the *root* उङ्. To this we add णिच् and सन्। We get उडुडावयिषति; the चङ् aorist is औडुडवत्। Similarly from the sûtra Dhâtu द्रु, we have with णिच् and सन्, the form दुद्रावयिषति, the चङ् aorist is अदुद्रवत्। Similarly दुद्रावयिषति and अदुद्रवत्। दुस्त्रावयिषति, अदुस्त्रवत्। The अत् in the last example is by VI. 1. 54 S. 2569, and we have अदुस्त्रवत्। Here the उ appears in the reduplicate. If there had not been the above jñâpaka rule we would have got the forms दिद्रावयिषति &c. Considering all these points, the author of the vârtikas, Kâtyâyana says: "The पु and यण् in the sûtra VII. 4. 80 indicate by implication that the substitute of a vowel caused by णि is sthânivat to the original." This sthânivadbhâva is illustrative of the prohibition also: namely that the substitution for the vowel does not take place till the reduplication is not done. Therefore, Bhattoji Dikshita has given the above rule in the form of a prohibition, rather than an affirmation. For prohibition is also illustrative of the sthânivadbhâva.

Question.—If this be a general rule, then from the root ऊर्णुनाव्, we get the following form in the aorist. ऊर्णु+णिच्+चङ्+त Here we redupli-

cate first, and get च्+कृत+णिच्+अ+त=चद्+कृत+णिच्+अ+त(VII. 4. 66. S 2244)=अचकीर्तत्। But this is incorrect.

Answer.—In order to prevent this, we have added the proviso, that the above rule will not apply when the substitution caused by णि is not, such as ends in अ। *Here the substitution caused by णिच् is not अ ending.* The *uttarakhanda* or the portion of the stem next to the reduplicate may contain either an original अ, or the अ of the affix चङ्। Thus in चीकरत् or चीकनत् the uttarakhanda of the stem is र् and न् without any अ of their own, the अ that is seen in them is the अ of चङ्, so they have no अ in their परिनिष्ठित state, so the author has used the additional word प्रक्रिया। They get an अ in the state of evolution. While in the case of गुणायपिपति &c. there is no अ in the prakriyâ state, for there the vowel is (गुणी+णि+ढङ्+ चति) यी, and it is in parinishṭhita state that we get अ of या॥

Moreover a jñâpaka rule applies to cases *sui generis* and not to every case indiscriminately. Therefore we have the form अचिकीर्तत् and not अचकीर्तत्। For the jñâpaka is derived here from the sûtra ग्रवण् णि *&c.*, where *always* the uttarakhanda of the stem will have the letter अ, and so the jñâpaka is confined to such cases only.

In the case of जन, *before* चङ्, *we reduplicate the* न *first, and then elide the* अ, as जन+णिच्+चङ्+त = जजन+णिच्+चङ्+त = जजन्+णिच्+चङ्+त (VI. 4. 48 S 2308)=जजन्+चङ्+त (VI 4 51. S 2313)=जजनत्।

ध्वन ३४३ शब्दे।

अदध्वनत्।

343 √dhvana, to sound. Pre. ध्वनयति। The Bhuâdi form is ध्वनति। Aor. अदध्वनत्।

कूट ३४४ परितापे।

'परिदाहे' इत्यन्ये।

344. √kûṭa to be distressed, some say it means to burn. (It means also to invite. See the next root)

Pre. कूटयति। The form कूटयति belongs to the आकुस्मीय class.

संकेत ३४५ ग्राम ३४६ कुण ३४७ गुण ३४७ च। चामन्त्रणे।

चात्कूटोऽपि। कूटयति। संकेतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्।

केत ३४७ रा। श्रावणे निमन्त्रणे च।

केतयति। निकेतयति 'कुण गुण चामन्त्रणे। चकारात्केतने।

345 sanketa. 346. √grâma. 347. √kuna. √guna to invite

By force of the word च, we draw in the root कूट also Thus कूटयति also means 'he invites.' While another reading is केत श्रावणे निमन्त्रणे च। keta 'to be learned' or 'to hear' 'to invite' As केतयति and निकेतयति। After this are read the following. √kuna √guna 'to invite.' By force of च they have the sense of ketana also. Pre. चकेतयति।

346. √grâma. Pre. ग्रामयति।

347. √kuna. √guna cha. Pre. कुणयति। गुणयति।

कूण ३४८ संकोचनेऽपि ।

348 √kûṇa, means to contract, close also, in addition to the meanings given to the roots mentioned last. Pre. कूणयति ।

स्तेन ३४९ चौर्ये ।

अतिस्तेनत् ।

349. √stena, to steal. Pre स्तेनयति । Aor अतिस्तेनत् । Nouns —स्तेनः । स्तैयम् । स्तैन्यम् ।

आगर्वादात्मनेपदिनः ।

Section VI. Up to the √garva inclusive, are Atmanepadis.

पद ३५० गतौ ।

पदयते । अपपदत ।

350 √pada, to go or move. Pre पदयते । The Divâdi form is पद्यते । Aor. अपपदत ।

गृह ३५१ ग्रहणे ।

गृहयते ।

351. √griha, to accept. Pre. गृहयते । Noun.—गृहयाळुः ।

मृग ३५२ अन्वेषणे ।

मृगयते । 'मृग्यति' इति कण्ड्वादिः ।

352 √mriga, to seek. Pre. मृगयते । The form मार्गयति is आधृषीय, and मृग्यते is कण्ड्वादि ।

कुह ३५३ विस्मापने ।

353 √kuha, to cheat, deceive, Pre कुहयते । Nouns —कुहना । कुह ।

शूर ३५४ वीर ३५५ विक्रान्तौ ।

354. √sûra 355 √vîra, to act the hero, be powerful. Pre शूरयते ।

355 √vîra Pre वीरयते ।

स्थूल ३५६ परिबृंहणे ।

स्थूलयते । अतुस्थूलत ।

356 √sthûla, to become big or stout, grow bulky or fat

Pre. स्थूलयते । Aor अतुस्थूलत । Nouns —स्थूलः । स्थविष्ठः । स्थवीयान् ।

अर्थ ३५७ उपयाच्ञायाम् ।

अर्थयते । आर्तथत ।

357. √artha, to request, beg, supplicate. Pre अर्थयते । I Fut अर्थयिता । II Fut. अर्थयिष्यते । Aor आर्तथत ।

सत्र ३५८ संतानक्रियायाम् ।

अससत्रत् । अनेकाच्त्वान्न षोपदेशः । सिसत्रयिषते ।

358 √sattra, to perform a sacrifice

As the root consists of more than one vowel it has not been taught with a ष as its initial. Therefore in the Desiderative the root स remains unchanged Pre सत्रयते । Aor अससत्रत । Desid सिसत्रयिषते ।

गर्व ३५९ माने ।

गर्वयते । अदन्तत्वसामर्थ्यादिति णिजभावपक्षे गर्वः । 'चातोऽन्त उदात्तः' लिटि 'चाम्' च प्रतत् । प्रत्ययेऽपि । इत्यागर्वीयाः ।

359 √garva to be proud. As the root ends in अ, therefore the णिच् is optional The result of this is that the final of the root is udâtta, by which the accent falls on व and also the Perfect is formed by आम् as the root consists of more than one vowel. So also in the case of the other roots mentioned hereafter. Pre गर्वयते ।

Here ends the section of आगर्वीय ।

सूत्र ३६० वेष्टने ।

सूत्रयति । असुसूत्रत् ।

360 √sûttra, to tie, to bind Pre. सूत्रयति । Aor. असुसूत्रत् । Inten. सोसूत्र्यते ।

मूत्र ३६१ प्रस्रवणे ।

मूत्रयति—मूत्रति ।

361 √mûttra, to make water, to micturate.

Pre. मूत्रयति or मूत्रति । Inten. मोमूत्र्यते ।

रूक्ष ३६२ पारुष्ये ।

362. √rûksha, to be severe. Pre. रूक्षयति । The Bhuâdi form रूक्षति ।

पार ३६३ तीर ३६४ कर्मसमाप्तौ ।

अपपारत् । अतितीरत् ।

363. √pâra. 364 √tîra, to accomplish.

Pre. पारयति। तीरयति। Aor अपपारत् । अतितीरत् ।

पुट ३६५ संसर्गे ।

पुटयति ।

365 √puta to compose put together Pre. पुटयति । The form पोटयति 'he speaks has already been taught before. पुटति 'he embraces is Tudâdi.

धेक ३६६ दर्शने इत्येके ।

अदिधेकत् ।

366. √dheka to see. This root is given by some Mâdhava does not give it Aor, अदिधेकत् ।

कत्र ३६७ शैथिल्ये ।

कत्रयति-कत्रति । 'कर्त' इत्यप्येके । कर्तयति-कर्तति ।

367, √kattra, to relax. Durga reads it as कर्त । Pre कत्रयति or कत्रति । कर्तयति or कर्तति । Nouns —कत्रिः । कात्रिवकम् ।

प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च ३६८ ।

प्रातिपदिकाद्धात्वर्थे णिच् स्यादिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः । पटुमाचष्टे पटयति । परत्वाद्वृद्धौ सत्यां टिलोपः । अपीपटत् । 'णौ चङि-' (२३१४) इत्यत्र भाष्ये तु 'वृद्धेर्लोपो बलीयान्' इति स्थितम् । अपपटत् । 'तत्करोति तदाचष्टे' । पूर्वस्य प्रपञ्चः । कीटिदाचष्ट इति धात्वर्थमात्र णिजर्थं । स हर्षस्यविषयितः । तेनातिक्रामति । अश्वेनातिक्रामति अश्वयति । हस्तिनातिक्रामति हस्तयति । 'धातुरूपं च । णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते । चकारोऽनुक्तसमुच्चयार्थः । तथा च वार्तिकम्— '* आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' इति । कंसवधमाचष्टे कंसं घातयति । इह 'कंस हन्' इति स्थिते ।

368. *Gana sutra.*—After every nominal stem the affix णिच् may be added with the force of a verb, and it is then treated like the affix इष्ठन् ।

All the changes which the affix इष्ठन् causes, takes place when णिच् is added to nouns The affix इष्ठन् *forms superlatives under* V 3. 55 S 2001 upto V 3 65 and changes caused by इष्ठन् are *given in sutra*, VI 4 154 and the following

Thus the nominal stem if feminine, becomes *masculine* when इष्ठन् is added The same will be the case when णिच् is added so *also there is the* elision of टि, the elision of विन् and मतुप्, the elision of यण् &c, the substitution of र स्थ, स्फा &c, and getting the designation of भ । Thus there is elision of टि in पटयति derived from पटु । The णिच् causes the vriddhi of the उ of पटु because the rule of vriddhi is subsequent and after the vriddhi has taken place the vârtika causes the elision of टि । Thus in this view, the aorist is अपीपटत् । But in commenting on the sûtra VII 1 1 S. 2314 णौ चङि &c Patanjali says ' The lopa rule is stronger than the rule of vriddhi" Therefore in पटु+णि+चङ् if we have टि lopa first then the equation is पट्+णिच+चङ्=पट्+०+चङ्=अपपटत् । In this view there is not sanvadbhâva nor lengthening as required by VII 4 93 S 231C and VII 4 94 S 2318, because there is the elision of उ (the vowel of अक् pratyâhara) The force of णिच् after nominal stems is given by the following

तत् करोति तद् आचष्टे ॥

Gana sutra—The affix nich coming after a noun denotes ' he does that thing or he declares that thing '

This is an amplification of the last gana sutra Doing or declaring whatever is expressed by the noun is the meaning of the affix णिच् । The senses of the tense affixes लट् &c is not mentioned here, for they will come as a general rule

तेनातिक्रामति ॥

Gana sutra – The affix णिच् is added to a nominal base in the third case in construction, in the sense of he excels by means thereof

As अश्वेनातिक्रामति=अश्वयति he surpasses by means of the horses so also हस्तयति ' he excels through the elephant

धातुरूपं च ॥

Gana sutra —The nominal base before the affix णिच् takes the form of a dhâtu (By force of the word च *other meanings not specified are also included*) Thus the following vârtika teaches —

Vârtika —After a word formed by a krit affix and denoting a story, there is added the affix nich with the force he recites or declares that legend, and thereby the *krit affix is elided and the word resumes its original form*, and the base is as if the agent

Thus कंसवधमाचष्टे=कंसं घातयति ' he declares or recites the story of the killing of Kansa Here we have कंस+वध । Now applies the following sûtra

Note —The Prâtipadika followed by the causative णि undergoes all the changes as it would have undergone had the affix इष्ठ followed it These changes are (1) पुंवद्भाव the feminine noun becomes masculine as,

एनीमाचष्टे = एतयति श्येतयति ॥ ङस् belongs to तसिलादि affixes and causes masculation by VI. 3 35 S 836 (2) रभाव:—the change of ऋ to र, as पृथुमाचष्टे = प्रथयति म्रदयति, see VI 4 161. S 1785, (3) टिलोप:—as, पटुमाचष्टे = पटयति, लघयति by this sûtra (4) यणादिपरम् i.e, the application of Rule VI 4 156 S 2015 as स्थूलमाचष्टे = स्थवयति ॥ According to the school of Bhâradvâja, three more purposes are served (5) विन् मतोर्लुक्—as स्रग्विणमाचष्टे = स्रजयति, वसुमन्तमाचष्टे = वसयति, see V 3 65 S. 2020, (6) कन्विधि:—the substitution of कन् for युवन् and अल्प (V 3 64 S 2019)—as युवानमाचष्टे or अल्पमाचष्टे = कनयति ॥ (7) प्रादि substitution, as required by VI 4. 157 S. 2016 as, प्रियमाचष्टे = प्रापयति ॥

Vart —After words ending in कृत् affixes and describing legends, comes the affix णिच्, when the sense is 'he recites or narrates that' The कृत् affix is elided, the word resumes its basic (प्राकृतिक) form, and the base is as if the agent, thus कंसवधमाचष्टे = कंसं घातयति, बलिबन्धमाचष्टे = बलिं बन्धयति, राजागमनमाचष्टे = राजानम् आगमयति

Note —Under the conditions mentioned in the last वार्तिक the upasarga आ is elided, when duration of time is meant expressing limit Thus आरात्रिविवासं आचष्टे = रात्रिं विवासयति, here the आ of आरात्रि is elided

Note —Under the conditions mentioned in the last note the affix णिच् has the sense of making wonderful, meaning 'attaining that.' Thus उज्जयिन्या: प्रस्थितो माहिष्मत्यां सूर्योद्गमनं सम्भावयते = सूर्यमुद्गमयति 'going from Ujjain he finds the sun rise in Mahismati (wonderful speed)'.

Note —When an asterism is in composition and the sense is that of knowing there comes the affix णिच् after a word ending in कृत् affix the कृत् affix is elided the word reassumes its basic form and the base is as if the agent Thus पुष्ययोगं जानाति = पुष्येण योजयति So also मघाभिर्योजयति

२५७४ । हनस्तोऽचिण्णलोः । ७ । ३ । ३२ ।

हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति णिति । नन्वसाङ्गस्य धातुमात्रस्य च कार्यविधिरयं प्राप्तः । ततश्चाङ्गाधिकारोऽपि । किं च । कृत्यतद्धे न स्यात् । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । सत्यम् ।" प्रकृतिवच्च " इति चकारो भिन्नक्रमः । कारकं च । कारकार्थम् । हेतुमण्णिचः प्रकृतेर्हन्त्यादेर्हेतुमत्यर्थे यादृशं कारकं धात्वर्थान्तर्भूतं द्वितीयान्तं यादृशं च कार्यं कृत्यतद्धादि तदितरोपीत्यर्थः । कंसमजीघतत् । 'कर्तृकरणाद्धात्वर्थे । कर्तृव्यापारार्थं करणं न तु बधुरादिणानमित्यर्थः । असिना हन्ति । घातयति ।

2574 त is substituted for the न of the root हन् before an affix with an indicatory ञ् or ण्, which causes also the vriddhi of the penultimate अ but the augment is not added before the Aorist-sign चिण्, nor before the Personal ending णल् of the Perfect

Note —The anuvritti of 'Taddhita' ceases and with it that of णित् also which causes Vriddhi in Taddhita only The णित् and ञित् do govern still Thus घात: (with घञ्), घातयति (with णिच्) • घातक: (with ण्वुल्), साधुघातिन् with णिनि, घातघातम् with णमुल् ॥ But अघानि and जघान with चिण्

and वधू ॥ This sûtra has reference to roots, and refers to those affixes only which come after roots (धातुप्रत्यय) therefore not in वाक्यस्थः from कृदन्त् ॥

Note —The words उपदेशेऽच् have been explained उपदेशे योऽच् तदन्तानां *i e stems ending in that which is a vowel in the state of original enunciation* Thus the causatives (णिच् *i e* इ ending) roots though not taught in the Dhâtupâtha will be governed by this rule The author has *not explained* उपदेशेऽच by उपदेशेऽजन्तानां for then the causatives would not be included for causative roots are not *listed* any where for upadesa means direct and express utterance the causatives are not so uttered Moreover the atidesa here is with regard to अङ्गकार्य and not all the other operations of चिण् । Thus from इङ् we have Passive Future दायिष्यते । Here इङ् is not replaced by गाङ् though in चिण् there is that substitution as अङ्गवि for this substitution by II 4 43 S 2434 is not an anga operation Similarly from हन् we have घानिष्यते here there is no वध substitution from इङ् we have अध्यायिष्यते here there is no गाङ् substitution

The इट् taught in this sûtra does not come where there is not chin vad bhâva because it is taught only as secondary to chin vad bhâva and not primarily The anuvritti of ârdhadhâtuka is current in this sûtra from VI 4 46 S 307 and it qualifies सीयुट् but not the others because they are all ârdhadhâtukas already and so do not require any such qualifications In fact स्य सिच and तासि are *invariably* ârdhadhâtuka while सीयुट् when in the Potential is sârvadhâtuka also When there is chin vad bhâva there is vriddhi because चिण् has an indicatory ण (VII 2 115 S 254)

Thus 1st Fut भाविता or भविता it will be become by some one ?

2nd Fut. भाविष्यते or भविष्यते it will be become by some one. Impve भूयताम् *let it be become* Imperf अभूयत *it was become* Pot भूयेत Bene भाविषीष्ट or भविषीष्ट may it be become

The aorist is formed as follows —

२७५८ । चिण् भावकर्मणोः । ३ । १ । ६६ ।

च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे । अभावि । अभाविषत अभविषत । तिङोऽत्र त्वात्कर्मणि न द्वितीया । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम् अन्वभविषाताम् । णिलोपः । भाव्यते । भावयांचक्रे । भावयाम्बभूवे । भावयामासे । इट् तस्यास्य चिणि इट् परे च कृते इ इति (२४१०) इति ह्रस्वो न । नाविष्णावचर्णादन्तेऽपि व्यतिह इत्यादौ सार्वधातुक इति इत्यनुवर्तितत्वात् । भाविता । चिण्वदिट आभीयत्वेनासिद्धत्वाण्णिलोपः । पदे । भावयिता । भाविष्यते-भावयिष्यते । भाव्यताम् । अभाव्यत । भाव्येत । भाविषीष्ट भावयिषीष्ट । अभावि । अभाविषाताम् । अभावयिषाताम् । बुभूष्यते । बुभूषाञ्चक्रे । बुभूषिता । बुभूषिष्यते । बोभूय्यते । बोभूयाञ्चक्रे । बोभूयिता । बोभूयिता-बोभूयिता । अकृत्सार्व- (२२९८) इति दीर्घः । स्तूयते विष्णुः । स्तुहि । स्ताविता-स्तोता । स्ताविष्यते-स्तोष्यते । अस्तावि । अस्ताविषाताम्-अस्तोषाताम् । गुणोऽर्ति-

(२३८०) इति गुणः । अर्यते । स्मर्यते । सस्मरे । परत्वान्नित्यत्वाच्च गुणे रपरे कृतेऽजन्तत्वाभावेऽ प्युपदेशग्रहणात्किंपर्यादिट् । आरिता–अर्ता । स्मारिता–स्मर्ता । गुणोऽर्ति– (२३८०) इत्यत्र नित्यग्रहणानुवृत्तेरकृतत्वान्नेह गुणः । संस्क्रियते । अनिदिताम्– (४१५) इति नलोपः । स्रस्यते । ऋदितस्तु नन्द्यते । सम्प्रसारणम् । इज्यते । अयङ् यि क्ङिति (२६४९) । शय्यते ।

• 2758 चिण् is the substitute of च्लि when त, of the third person singular Atmanepada follows, denoting the action (भाव) or the object कर्म

Note —A verb is said to denote an action when it is used impersonally and it is said to denote an object when used in the Passive sense. As अशायि भवता it was lain by you *i e*, you lay, अकारि कटो देवदत्तेन, 'the mat was made by Devadatta The repetition of चिण् here is for the sake of distinctness

Thus another form of the Aorist is अभावि । The Conditional is अभाविष्यत or अभविष्यत ।

Conjugation of भू in the Impersonal

Pre भूयते । Per बभूवे । I Fut भाविता or भविता । II Fut भाविष्यते or भविष्यते । Impve भूयताम् Imperf अभूयत । Pot भूयेत । Bene भाविषीष्ट or भविषीष्ट । Aor अभावि । Condl अभाविष्यत or अभविष्यत ।

Passive

In the Passive the verb does not govern the accusative because the force of the accusative is contained within the tense affix Thus अनुभूयते आनन्दश्चैत्रेण त्वया मया च । 'The pleasure is experienced by Chaitra by thee and by me Pre 3rd S अनुभूयते । D अनुभूयेते । Pl अनुभूयन्ते । 2nd अनुभूयसे । 1st S. अनुभूये । Aor. 3 S अन्वभावि । D अन्वभाविषाताम् or अन्वभविषाताम् ।

From the causative √भावि we may form also the Impersonal and the Passive as follows —भावि+यक्+ते=भाव्+यक+ते (The णि is elided by VI 4 51 S 2313)=भाव्यते 'it is caused to be Pre 3rd S भाव्यते । Per भावयाञ्चक्रे भावयां बभूवे or भावयामासे । In this last example we have आसे and not आस्ते । The 3rd S affix त is replaced by ए (III 4 81 S 2241) in the Perfect Similarly 1st S इट becomes ए by III 4 79 S 2233 Thus अस्+ए (whether 3rd Singular or 1st Singular)=अ+अस्+ए=आस्+ए । But as a Now VII 4 52 S 2250 requires the स् to be changed to ह् । But as a matter of fact it is not so Because they say the rule 2250 applies to the स् of अस् before the Sârvadhâtuka ए only, and it is there only that the स is changed to ह, because अस् is read along with तास्—affix in VII 4 50 S 2191 whose anuvritti runs into VII 4 52 S 2250 Therefore, before the Sârvadhâtuka ए the स of अस् is changed to ह । Thus in the लट्, First Person singular of अस् preceded by व्यति, we have व्यति+अस्+ए=व्यतिहे (the अ is elided by VI 4 111 S 2469 and स changed to ह by S. 2250) But not so in the Perfect 3rd S भावयामासे ।

The 1st Fut is भाविता। It is thus derived भावि+इट्+ता The इट् augment here is added by VI 4 62, S 2757 This इट् is called चिण्वदिट् and is distinguished from the ordinary इट् augment of the seventh Book of Panini The chin vad it being ordained by VI 4 62 an ábhiya rule which commenced with VI 4 22 S 2183 is considered as if non existent Therefore in भावि+(इट् non existent)+ता the णिच् is considered to be followed by an अनिट् affix ता and so the णि is elided by णेरनिटि VI 4 51 S 2313 and we get भाव्+इट्+ता=भाविता।

The chin vad bháva being optional when we do not have it then the form is भावि+इट्+ता=भावयिता (here the इट् is *not* chin vad it)— it will be caused to be

The 2nd Fut is भाविष्यते (chin vad इट्) or भावयिष्यते।

The Imperative is भाव्यताम्। The Imperfect is अभाव्यत। The Potential is भाव्येत। The Benedictive is भाविषीष्ट or भावयिषीष्ट। The Aorist is अभावि D अभाविषाताम् or अभावयिषाताम् &c

The Impersonal and Passive conjugations of the Desiderative of भू is Pre बुभूष्यते it is wished to be Per बुभूषा चक्रे it was wished to be I Fut बुभूषिता 'it will be wished to be *II Fut* बुभूषिष्यते *it will be wished to be* The Aorist with चिण् is अबुभूषि।

The Intensive Impersonal or Passive is बोभूयते and the yan luk is बोभूयते। The Per बोभवा चक्रे। I Fut बोभाविता or बोभविता।

Similarly from स्तु to praise, the Impersonal and Passive conjugations are Pre स्तूयते as स्तूयते विष्णुः 'Vishnu *is praised* The short उ is lengthened before the affix यक् by VII 4 25 S 2298 Per तुष्टुवे। I Fut स्ताविता or स्तोता (S 2757) II Fut स्ताविष्यते or स्तोष्यते। Aorist 3 S अस्तावि Dual अस्ताविषाताम् or अस्तोषाताम्।

Similarly from the √ऋ to go,' we have अर्यते (ऋ+यक्+ते=अर्+य+ते there is *guna* by VII 4 29 S 2380) it is gone.

Similarly from √smri to remember we have Pre स्मर्यते it is remembered Per सस्मरे 'it was remembered' I Fut of ऋ is आरिता or अर्ता and स्मृ is स्मारिता or स्मर्ता। The two roots are gunated to अर् and स्मर् because the rule ordaining guna is subsequent to the rule of इट् of chin vad it and it is a *nitya* rule (because the guna rule will debar the vriddhi rule of अचोऽञ्णिति VII 2 115 S 254, and thus we get अर् and स्मर् the र् being added by I 1 51 S 70; and now अत उपधायाः VII 2 116 S 2282 *will cause vriddhi*, and we get आर् and स्मार्, thus guna is nitya). *Now* after guna the roots are no longer vowel ending for they end in र् yet as in the upadesa state these roots were vowel ending they will take the इट् augment of chin vad इट् *Thus we have* आरिता। When this इट् is not added we have अर्ता, स्मारिता or स्मर्ता।

Why there is no guna of the root ऋ which with the augment सुट् becomes स्कृ and thus becomes sanyogâdi and so VII 4 29 S 2380 ought to

apply to it.' No because, the word संयोगादेः of VII 4 10 S. 2379, whose anuvritti is current in S 2380, is qualified by the word *nitya* of VII. 4. 8. S 3587, therefore only those roots which are *invariably* sañyogâdi are gunated and not a root like स्कृ which becomes sañyogâdi by the addition of the augment सुट्। Therefore there is no guna in संस्क्रियते।

Similarly from √srans we have स्रस्यते 'it is fallen'. The nasal is elided by VI 4 24 S. 415. But from √nadi (which being इदित् becomes नन्द्) we have नन्द्यते 'it is become happy by so and so, i e, so and so is happy.' Here the nasal is not elided, because it is इदित्।

Similarly from यज् 'to worship' we have इज्यते 'it is worshipped.' The य is changed to इ by vocalisation under VI 1. 15 S 2409 before the कित् affix यक्।

Similarly from शी we have शय्यते The शी is changed to शय् before the कित् affix यक् by VII 4 22 S 2649

२७५९। तनोतेर्यकि। ६। ४। ४४।

आकारोऽन्तादेशो वा स्यात्। तायते-तन्यते। ये विभाषा' (२३१९)। जायते-जन्यते।

2759 The long आ may be optionally substituted for the final of तन् before the Passive characteristic यक्।

Thus तायते or तन्यते, but no option is allowed in तंतन्यते with यङ्।

२७५९। क। ये विभाषा। ६। ४। ४३।

2759A The long आ is optionally substituted for the final of √jan, √san, and √khan before an affix beginning with य and which has an indicatory क् or ङ्।

This sûtra is a repetition of No 2319. Thus from √जन् we have जायते or जन्यते 'it is born.'

२७६०। तपोऽनुतापे च। ३। १। ६५।

तपश्च्लेश्चिण् न स्यात्कर्मकर्तर्यनुतापे च। अन्वतप्त पापेन। पापं कर्तृ तेनानुतप्त इत्यर्थः। कर्मणि लुङ्। यद्वा पापेन पुंसा कर्त्रा अन्वतापीत्यर्थः। 'घुमास्था-' (२४६२) इतीत्वम्। दीयते। धीयते। 'आदेचः-' (२३७०) इत्यत्रायितीति कर्मधारयादित्सप्रकरणकारादौ निषेधः। ग्ला आदि शित्वाभावात्तद्भिन्नात्स्वम्। ग्लायते।

2760. चिण् is not the substitute of च्लि after the verb तप् 'to suffer', when used reflexively, and when the sense is that of experiencing remorse.

This prohibition applies even to the passive and impersonal voices of the verb तप्, as अतप्त तपस्तापसः 'the ascetic performed austerity', अन्वतप्त पापेन. 'The remorse was experienced by the sinner'. The word पाप means here 'the doer of पाप,' namely the sinner. "By him is experienced remorse," is the sense of the above sentence. The aorist अन्वतप्त is Passive. Or it may mean "by the person, or the doer of sin was experienced the

remorse resulting from sin, —in other words 'the sinner repented *from* evil deeds'

By VI. 4. 66 S. 2462, the ghu verbs substitute a long ई for this आ before यक्। As दीयते 'it is given' धीयते it is held'

By VI 1. 45 S. 2370, the roots ending in ए or ऐ ओ औ in the *Dhâtu* pâṭha, change their diphthongs into आ before all affixes except those which have an indicatory श। Now त श्, the 3rd P S Atmanepada affix of the Perfect is a शित् affix. Will therefore diphthong ending roots not change their vowels into आ before the शित् affix एश्, because of the prohibition of अशिति in S 2370? The word अशिति however was explained as a Karmadhâraya compound meaning an affix which has an indicatory श *in its beginning* and as एश् has not श in its beginning the prohibition of that sûtra does not apply Thus we have आ in the Perfect 3rd P S also As ग्लै+एश=ग्ला+एश् (VI 1 45 S 2370)=जग्ले।

Note —The augment इट् is of course added to the affixes स्य सिच्, सीयुट् and तासि and not to the stem What are the special objects served by this atidesa aphorism? They are given in the following verse —

Kârikâ चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं
दीर्घश्चोक्तो यो मितां वा चिणीति।
इट् चासिद्धस्तेन मे लुप्यते णि-
र्नित्यश्चायं वलनिमित्तो विघाती॥

Note —First —The vriddhi takes place as in चिण् (VII 2 116 VII 3 34) Secondly there is the addition of युक् augment (VII 3 33) Thirdly घ is substituted for the ह of हन् (VII 3 54) Fourthly the roots having indicatory म (Bhuâdi 809 to 873) optionally lengthen their vowel (VI. 4 93) and lastly the addition of the augment इट् being considered as asiddha or not to have taken effect by VI 4 22 the rule VI 4 51 applies and the causative affix णि is elided and this इट् is added irrespective of the conditions and limitations of VII 2 35 &c

(1) Roots ending in a vowel in the Dhâtupâtha with the affix स्य as, चि:—चायिष्यते or चेष्यते अचायिष्यत or अचेष्यत। So also with दा, as दायिष्यते or दास्यते अदायिष्यत or अदास्यत।

In शमि there are three forms the two शामिष्यते or शमिष्यते अशामिष्यत and अशमिष्यत being given by the elision of the causative ending by VI. 4 51, in spite of the इट् augment which is considered as asiddha and शम् being a root of मित् class the अ is lengthened optionally by VI 4 93 The forms शमयिष्यते and अशमयिष्यत are given when not treated as चिण्, the causative *is retained the penultimate being shortened by VI 4 92* With the affix सिच्—अचायिषाताम् or अचेषाताम् अदायिषाताम् or अदिषाताम् and अशामिषाताम् or अशमिषाताम्। With the affix सीयुट्—चायिषीष्ट or चेषीष्ट, दायिषीष्ट or दासीष्ट and शामिषीष्ट or शमिषीष्ट। With the affix तासि:—चायिता *or* चेता

दायिता or दाता शमिता or शमिता । The चिण् aorist model of these roots is आचायि अदायि (VII. 3 33), and अशमि (VII. 3. 34) or अशामि (VI. 4. 93).

(2) हन् —Fut घानिष्यते or हनिष्यते, Con अघानिष्यत or अहनिष्यत Aor अघानिषाताम् or अवधिषाताम् and अहसाताम् (II 4 44), Ben घानिषीष्ट or वधिषीष्ट, Per. Fut घानिता or हन्ता ॥ The चिण् model is अघानि ॥

(3) ग्रह:—Fut. ग्राहिष्यते or ग्रहीष्यते, Con अग्राहिष्यत or अग्रहीष्यत, Aor. अग्राहिषाताम् or अग्रहीषाताम् (अग्रहिषाताम्) ?, Ben ग्राहिषीष्ट or (ग्रहिषीष्ट) ? ग्रहीषीष्ट, Per Fut ग्राहिता or ग्रहिता । The lengthening of ही takes place by VII 2. 37 The चिण् model is अग्राहि ॥

(4) दृश्:—Fut. दर्शिष्यते or द्रक्ष्यते, Con अदर्शिष्यत or अद्रक्ष्यत, Aor. अदर्शिषाताम् or अदृक्षाताम्, Ben दर्शिषीष्ट or दृक्षीष्ट, Per Fut दर्शिता or द्रष्टा (दर्ष्टा) ? । The चिण् model is अदर्शि ।

Why do we say before स्य &c ? Observe चेतव्यम् दातव्यम् । Why in the Impersonal and Passive ? Observe चेष्यते and दास्यते ॥ Why in Upadesa ? The rule applies to कारिष्यते also though कार् (after guna change) ends in a consonant but in its original enunciation it ends with a vowel The atidesa rule being enunciated with regard to stems (anga), prevents the substitutions of हन् and इङ् and इण् । Thus हनिष्यते, घानिष्यते एष्यते or आयिष्यते अध्येष्यते or अध्यायिष्यते । The substitutes वध or गा (II 4 42 43 45, 50) do not come according to the Kâsika, when these roots are treated as चिण ।

२७६१ । आतो युक्चिण्कृतोः । ७ । ३ । ३३ ।

आदन्तानां युगागमः स्याच्चिणि ञिति णिति कृति च । दायिता-दाता । दायिषीष्ट-दासीष्ट । अदायि । अदायिषाताम् । अदिषाताम् । अघानिषाताम् । अवधिषाताम् । अगायिषाताम् । अगासाताम् । हन्यते । अचिण्णलोः (२५७४) इत्युक्तेर्हनस्तो न । हो हन्तेः—' (३५८) इति कुत्वम् । घानिता । हन्ता । घानिष्यते-हनिष्यते । आशीर्लिङि वधादेशस्यापवाद चिण्वद्भाव । आर्धधातुके भीयुटोति विशेषविहितत्वात् । घानिषीष्ट । पक्षे । वधिषीष्ट । अघानि । अघानिषाताम् । अहसाताम् । पक्षे वधादेशः । अवधि । अवधिषाताम् । अघानिष्यत-अहनिष्यत । न च स्यादिषु चिण्वदित्यतिदेशाद्वधादेश स्यादिति वाच्यम् । अङ्गस्य (२००) इत्यधिकारादाङ्गस्यैवातिदेशात् एइनो । चिण्वदिटो न दीर्घत्वम् । प्रकृतस्य वलादिलक्षणस्यैवेटो ग्रहोऽलिटि—' (२५६२) इत्यनेन दीर्घविधानात् ग्राहिता-ग्रहीता । ग्राहिष्यते ग्रहीष्यते । ग्राहिषीष्ट ग्रहीषीष्ट । अग्राहि । अग्राहिषाताम्-अग्रहीषाताम् । दृश्यते । अदर्शि । अदर्शिषाताम् । चिणः कित्त्वादम । अदृक्षाताम् । गिरतेर्लुङि ध्वमि चतुरधिक मतम् । तथा हि । चिण्वदिटो दीर्घो नेत्युक्तम् । अगारिध्वम् । द्वितीये स्यिटि वृतोवा (२३८१) इति वा दीर्घः । अगरीध्वम्- अगरिध्वम् । एवं अयाणा सत्व ढत्व द्वित्वत्रय चेति षड् वैकल्पिकानि । इत्थं षणवतिः । लिङ्सिचो - (२५२८) इति विकल्पस्यादिडभावे 'उश्च (२३६८) इति कित्त्वम् । ऋवरश्च इति च (३५४) इति दीर्घः । 'इणः षीध्वम्- (२२४७) इति नित्य ढत्वम् । अगाढ्र्वम् । इयमाना द्वित्वविकल्पेऽष्टौ । उक्तषण्णवत्या सह सकलने ऽष्का सप्तोति ।

इट् दीर्घश्चिण्वदिट् लत्वढत्वे द्विकत्रिक तथा ।
इत्याद्याभ्या विकल्पेन चतुर्भिरधिक मतम् ।
देवदत्तकृतराकर्णनिति लः यन् चिलोपः । मन्यते मोहो मुकुन्देन ।

2761. *A root-stem ending in* आ *receives the augment* युक् (य्), before the Aorist sign चिण्, and before a krit-affix with an indicatory ञ् or ण्, which causes also the vṛiddhi of the root-vowel.

Note —As अदायि, अधायि with चिण्, दायः and दायकः, धायः, धायकः with घ and ण्वुल्। Why 'चिण् and krit only'? Observe ददौ दधौ in the Perfect, and चौडिः, बालाकिः with इञ् a Taddhita affix (IV 1. 96). So also या देवता अस्य = याः।

Thus I. F. दायिता or दाता। Ben दायिषीष्ट or दासीष्ट। Aor 3rd S अदायि, D अदायिषाताम् or अदिषाताम्। So also अधायिषाताम् or अधिषाताम्। So also from ग्लै अग्लायिषाताम् or अग्लासाताम्।

From the √हन् we have Pre. हन्यते I F घानिता Here the न of √हन् is not replaced by त by VII. 3 32 S. 2574 and as the I. F. is चिण्वत् so *there is no* त *substitution here* The ह is changed to घ by VII 3. 54 S 358 When there is no चिण्वद्भाव, I. F. is हन्ता। II F. घानिष्यते or हनिष्यते। In the Benedictive, the √हन् is not replaced by वध, because the चिण्वद् भाव *supersedes* the substitution of वध

Note —But in the Aorist, the वधादेश will optionally take place on the maxim येन ना प्राप्ति &c., for the वधादेश is superseded in the case of लिङ् (II 4 42 S 2433) but not in the case of लुङ् (II. 4 43 S. 2434)

The वधादेश takes place in both the Parasmai and Atmanepadas of the Benedictive by II. 4. 42 S. 2435, but the चिण् वद् भाव is specially confined to the Atmanepada Benedictive, for there is no वधादेश here Thus the Benedictive is घानिषीष्ट (with चिण्वद् भाव) and वधिषीष्ट without it The Aorist is अघानि, D अघानिषाताम्। Without चिण्वद् भाव is अहसाताम्। In the other alternative, there will be वधादेश by II 4. 44 S. 2696, and thus we have अवधि, D अवधिषाताम्, The conditional अघानिष्यत or अहनिष्यत।

It should not be said that by चिण् वद् भाव there should be वधादेश in the Future, Conditional &c, also, for the analogy of चिण्वद् operation is confined to the operations relating to a stem (अङ्ग) only, because VI. 4 62 S 2757 *is an aṅgâdhikâra rule in which the anuvṛitti of aṅga is current.* Therefore though there is वधादेश before चिण् by II. 4 43 S. 2434, yet this वध operation not being an aṅga operation, will not take effect by force of the rule S 2757.

Note —अहसाताम् is thus evolved —हन्+सिच्+आताम्। The सिच् is कित् by VI 4 37 S 2428 Therefore the न is elided. Thus we get अहसाताम्।

Similarly from the √ग्रह (S 2757), we have Pre गृह्यते। I. F ग्राहिता where there is चिण्वद् भाव. Why is not the इट् of ग्राहिता lengthened by VII. 2. 37 S. 2562? The इट् ordained by S. 2757 is not lengthened, because the lengthening ordained by S 2562 is of the वलादि इट्, *i.e.*, of the इट् ordained by the 7th Book of the Ashṭâdhyâyî *i.e.*, by VII. 2 35 S. 2194

and as the rule of lengthening of इट् (VII. 2. 37 S 2562) follows just after the rule ordaining the वलादि इट् (VII. 2 35), it is confined by context to that इट् only and not to the चिण्वद् इट्. Where there is not चिण्वद् भाव, we have ग्रहीता where there is lengthening of the वलादि इट्। II. F ग्राहिष्यते, without चिण्वद् ग्रहीष्यते। Ben ग्रहीषीष्ट without चिण्वद्, and ग्राहिषीष्ट with चिण्वद्। Aor. 3. S. अग्राहि। D. अग्राहिषाताम् or अग्रहीषाताम्।

From √दृश् (S 2757), Pr. दृश्यते। Aor 3rd अदर्शि, D अदर्शिषाताम् with चिण्वद् भाव।

Note —The √दृश् forms its Aor. with चिण् because the क्स is prohibited by III 1. 47 S. 2407 and when it takes चिण्, then there is चिण्वद् भाव।

As the सिच् is कित्, by I. 2. 11 S. 2300, there is no गुण. Thus we have अदृक्षाताम्।

From √grî, we have in the Aorist Second Person Plural (dhvam), 104 forms Thus —With chiṅ-vad इट् which is not lengthened as we have said already, we get अगारिध्वम्। with the valâdi-इट्, the lengthening is optional by VII. 2. 38 S 2391 Thus अगरीध्वम् or अगरिध्वम्। In every one of these the र is changed optionally to ल by VIII 2 21 S. 2541 Thus there are six forms. Again in every one of these six, the ध may optionally be changed to ढ by VIII 3 79 S 2325 Thus there are twelve forms. Of these twelve forms the six in ध may double their ध, and the six in ढ similarly double their ढ. Thus there are 24 forms. The doubling takes place by अनचि च (VIII 4 47. S. 48).

Again when we apply the rule यणः प्रतिषेधो वाच्यः (See under VIII. 4. 65 S 71), the व is doubled in every one of the above 24 forms. Thus there are forty eight forms.

Again by applying अनचि च (VIII 4 47 S 48) the ग is doubled. There are thus 96 forms. Thus —

I	II	III	IV.	V.	VI
अगारिध्वम्।	अगालिध्वम्।	अगरीध्वम्।	अगलीध्वम्।	अगरिध्वम्।	अगलिध्वम्।
अगारिढ्वम्।	अगालिढ्वम्।	अगरीढ्वम्।	अगलीढ्वम्।	अगरिढ्वम्।	अगलिढ्वम्।
अगारिद्ध्वम्।	अगालिद्ध्वम्।	अगरीद्ध्वम्।	अगलीद्ध्वम्।	अगरिद्ध्वम्।	अगलिद्ध्वम्।
अगारिड्ढ्वम्।	अगालिड्ढ्वम्।	अगरीड्ढ्वम्।	अगलीड्ढ्वम्।	अगरिड्ढ्वम्।	अगलिड्ढ्वम्।
अगारिध्व्वम्।	अगालिध्व्वम्।	अगरीध्व्वम्।	अगलीध्व्वम्।	अगरिध्व्वम्।	अगलिध्व्वम्।
&c.	&c	&c	&c	&c	&c
अग्गरिध्व्वम्।	&c.	&c.	&c	&c	&c

To these ninety-six forms must be added the eight other forms thus evolved. By लिङ्सिचोः (VII 2. 42. S. 2528) the इट augment is optional. When, therefore there is no इट् we have अगृ+ध्वम्। The affix is treated as कित् by I 2 12 S. 2308, and so the long ॠ is replaced by इ (VII. 1 100. S 2390) and this इ is followed by र by I. 1. 51 S. 70 Thus अगिर्+ध्वम् = अगीर्+ध्वम् (the lengthening is by VIII. 2 77. S. 354) = (1) अगीर्ध्वम्

(the ष is changed to ढ compulsorily by VIII 3 78 S. 2247) This is *one* new form. The ढ here may be doubled by VIII. 4 46 S 59, as, (2) प्रणीढ्ढ्वम् । The ढ of these two forms may be doubled by यणो मयः &c, as, (3) प्रणीढ्ढ्वम् and (4) प्रणीढ्ढ्ढ्वम् । Thus there are four forms. The ण of every one of these four, may be doubled by अनचि च (VIII. 4 47. S. 48). Thus there are *eight* forms. These eight forms, added to the above ninety-six forms give us one hundred and four forms. The whole of this is summarised in the following verse

' इट दीर्घश्चिणषदिट् लस्यैढत्वे द्वित्वमिक तथा ।
हस्वष्टानां विकल्पेन चतुर्भिरधिकं शतम् " ॥

Similarly from the *causative* णि-root a Passive stem is formed with यक्, when णि is elided. As गम्यते भोदो मुकुन्देन ।

२७६२ । चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । ६ । ४ । ९३ ।

चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात् । अकृते 'मितां ह्रस्वः' (२५६८) इत्यत्र तु न विकल्पितः । ण्यन्तान्णौ ह्रस्वविकल्पार्थमिदम् । दीर्घविधौ हि णिलोपो न स्थानिवदिति दीर्घः सिध्यति । ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम् । भाष्ये तु '× पूर्वत्रासिद्धे न स्थानिवत् ×' द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः । शामिति जातिपक्षे निर्देशः । दीर्घग्रहणं चेदं नास्त्विति तदाशयः । शामिता-शमिता-शमयिता । शामिष्यते-शमिष्यते-शमयिष्यते । यङन्तादियम् । संशाम्यते । संशामिता-संशमिता-संशमयिता । यङ्लुगन्तादप्येवम् । भाव्यते तु यङन्ता एवेयमिति दीर्घो नास्तीति विशेषः । ण्यन्तत्वाभावे । शर्द्धते मुनिना ।

2762 Optionally a long may be substituted for the penultimate of the causative of मित् roots, before the third person of the Passive-Aorist in चिण् (इ), and before the Absolutive affix णमुल् (अम्) ।

In the case of the primitive roots the shortening ordained by VI 4. 92 S 2568 is *compulsory*; the present sûtra does not ordain optional *lengthening* in their case It does not apply to Primitive roots. But the optional shortening of the causative of a causative was unprovided for: hence this sûtra applies to the causative of a causative

Moreover the present sûtra is a दीर्घविधि a rule of lengthening. Therefore, in forming the causative of a causative, when the first णि is elided, the elision does not act as sthânivat, because of the prohibition of I 1. 58. S. 51 in favor of dîrgha vidhi and so there is lengthening But if this sûtra were a hrasva-vidhi (i.e., if instead of dîrgha, the sûtra had used hrasva) then the elided णि would be sthânivat, and there would be nothing to prevent its being sthânivat.

In the Mahabhâshya, the commentator Patanjali relying on the vârtika पूर्वत्रासिद्धे न स्थानिवत् has shown that Pânini's sûtra I 1. 58 S 51 is superfluous so far as (1) rules of doubling, (2) rules of homogeneous letters, (3) rules of anusvâra (4) rules of lengthening (5) rules of जश् letter substitution, and (6) the rules of चर् letter substitution are concerned.

The word णौ in the sûtra refers here to the whole class of causatives. The use is that the word दीर्घ should not be used in the sûtra: for the desired object can be obtained by making the *hrasva* (short) optional.

Thus I Fut. of the Passive of the causative घटि is घाटिता or घटिता or घटयिता। II. Fut घाटिष्यते or घटिष्यते or घटयिष्यते। The णिच् may be added to the Intensive.

As जंघन्यते। I. Fut जंघाटिता or जंघटिता or जंघटयिता। Aor. अजंघटि or अजंघाटि।

The forms of the causative of the yañ-luk will also be the same.

According to the Mahâbhâshya there is no lengthening, after the Causative of the Intensive, when there is chañ-vad चङ्, because the elided य of यङ् being sthânivat, the य् is not immediately followed by णिच्; and so the अ of घट् is not *penultimate* and consequently the lengthening or the vriddhi of the penultimate finds no scope. This is the peculiarity according to the Bhâshya.

When there is no Causative णिच्, the simple Passive form is घट्यते घटिता। This is an Impersonal verb.

Note—In घटिता &c, the gaṇa sûtra घटादयः &c, the root being मित्, the penultimate would *always* have been short by VI 4 12. S 2568: the present sûtra makes the *long* optional.

Note—The optional *short* of the penultimate in the case of the causative of a causative could not be obtained by S 2568 as the elided णिच् would intervene, if the present sûtra were a hrasva-vidhi.

Note from the Kâśikâ. Why have we used the word दीर्घ in the sûtra? The rule does not teach merely the *optional shortening*. So that in the alternative of short, we have अघटि and in the other alternative we have अघाटि, so that there is long. For had दीर्घ not been used, it would have taught optional short only, i.e., it would be a ह्रस्वविधायकविधि only, and there will be this difficulty—when the causative of causative is taken, as in घटयन्तं प्रयुङ्क्ते, there would not be lengthening in the alternative. Because the lopa substitute of णि would be sthânivat therefore, the णि which would be followed by णिच् or णमुल्, would not have in it the मित् añga, because the first णि intervenes between the मित् añga and the णिच् and णमुल् affix, and that णि which is preceded by a मित् añga is not followed by णिच् and णमुल् because the second णि (though elided) intervenes. Therefore, there would not be *optional* short here, but *compulsory* short, by the preceding Ashṭâdhyâyî sûtra and no lengthening. The rule, therefore, teaches the optional substitution of the *long* (दीर्घ) as there arises no such anomaly in this view. For taking this rule to be a दीर्घविधि, the lopa substitution of णि would not be sthânivat, by the express prohibition contained in I. 1. 58. and so we can get forms of double causative. But if we take it a ह्रस्वविधायकविधि, then the lopa-ādeśa of णि being sthânivat, would prevent getting

the alternative long form. Therefore, the word दीर्घ is used in the sûtra to make this rule a दीर्घविधि, and prevent sthânivat bhâva.

Thus take the causative of शम् which will be शमि by the last Ashtâdhyâyî sûtra. Take its Intensive with यङ्, शमि+यङ् which causes doubling by VI 1 9=शमि शमि+यङ्=शशमि+यङ् (VII 4 60) =शं शमि+यङ् (मुक् or nasal being added to the abhyâsa by VII 4.85) =शंशमि+यङ्= शंशम्+य (VI. 4 51) =शंशम्य Add णिच् to this i e make the causative of the Intensive शंशम्+य+इ। Then the अ of य is elided by VI 4 48=शंशम् +य्+इ Then य् is elided by VI 4. 49 =शंशम+इ=शंशमि This शंशमि is the causative root of the Intensive of the Causative शम्। Now add चिण् or णमुल् to this root and we get two forms short and long अशंशमि or अशंशामि with चिण् and शंशमम् or शंशामम् with णमुल्। The long forms could not have been obtained had this not been a दीर्घविधि for then the lopâdesâ of णिच् being sthânivat would have prevented the application of दीर्घ।

The *roots* शम् and तम् (*both Divâdi*) ending in म् do not ever lengthen the root vowel before चिण् and णमुल् by VII 3 34 The present sûtra, therefore, does not apply to the *simple* roots The derivative causative roots of these namely शमि—शमयति तमि—तमयति optionally lengthen the penultimate before these affixes Thus शमि+चिण्=शम्+चिण् (the इ of णि being elided by VI 4 51) =*शामि or शमि* (*with the augment* अट्=अशामि *or* अशमि)। This *rule* applies when the Causative of the Causative *root* takes these affixes

In fact the mention of the word दीर्घ implies as much, otherwise the sûtra could have been made without this word for the word 'optionally would have brought in both 'short' and 'long' Thus in शमयन्तं प्रयुङ्क्ते 'he causes another to make quiet we add णि (Causative sign), to the Causative root शमि as शमि+णि=शम्+इ (VI 4.51)=शामि, the lopâdesa here is not *sthânivat for the purpos s of lengthening* (*दीर्घविधि*) the अ of शम् (I. 1 58)॥ From this शामि with चिण् we get अशामि and with णमुल् we get शामम्। But we cannot get the short forms, by taking the other alternative, as the lopâdesa will then be stânivat Hence the necessity of the word दीर्घ in the sûtra Thus the चिण् and णमुल् forms of the Causative of the Causative (*i e*, the double Causative) of शम् are अशमि or अशामि शमंशमम् शामंशामम् and *from the form* शंशमयति we have अशंशमि *or* अशंशामि *शंशमंशंशमम्* or शंशामंशंशामम्॥ These latter are from the Causative stems of the Intensive root The sign यङ् of the Intensive has been elided (VI 4 49) as shown above

२७६३ । नोदात्तोपदेशस्य मान्तस्यानाचमेः । ७ । ३ । ३४ ।

उपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अशमि । अदमि । 'उदात्तोपदेशस्य' इति किम् । अगामि । मान्तस्य किम् । अवादि । 'अनाचमेः' किम् । आचामि । * अनाचमिकमिवमीनामिति वक्तव्यम् * । कमि 'आयादयः' (२३०४) इति णिङभावे । अकामि । णिङ्णिचो

Note—The phrases दुर्विज्ञाता युक्तिः and others like it are incorrect Why do we say ' चिण् and krit only ? Observe बधान -बदाम बधाम ।

The root बध हिंसायाम् ends in a consonant, it is √badh and not √badha. There is no vriddhi of its penultimate अ because VII. 3 35 S 2512 prevents it Thus अबधि ।

In the case of √जागृ there is no guna but vriddhi because VII 3 85 S 2480 prohibits it with regard to चिण् । Thus अजागारि ।

२७६४ । भञ्जेश्च चिणि । ६ । ४ । ३३ ।

नलोपो वा स्यात् । अभाजि-अभञ्जि ।

2764 The nasal may be optionally elided in भञ्ज before the third person Passive of the Aorist in चिण् (इ)

Thus अभाजि or अभञ्जि । This is an aprâpta vibhâsha and teaches for the first time the elision of न in a certain contingency

२७६५ । विभाषा चिण्णमुलोः । ७ । १ । ६९ ।

लभेर्नुमागमो वा स्यात् । अलम्भि-अलाभि । व्यवस्थितविभाषात्वात्सोपसर्गस्य नित्यं नुम् । प्रालम्भि । द्विकर्मकाणां तु

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥

गौर्दुह्यते पयः । अजा ग्रामं नीयते । ह्रियते । कृष्यते । उह्यते । बोध्यते माणवकं धर्मः । माणवको धर्ममिति वा । भोज्यते माणवकमोदनः । माणवक ओदनं वा । देवदत्तो ग्रामं गम्यते । अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते । मासो मासं वा आस्यते देवदत्तेन । विवक्षातः प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः ।

इति भावकर्मतिङ्प्रकरणम् ।

2765 The नुम् is optionally added to लभ not preceded by a Preposition, before the चिण् Aorist and the Absolutive णमुल्

Thus अलाभि or अलम्भि लाभंलाभम् or लम्भंलम्भम् । This is a Vyavasthita vibhâshâ the option is allowed where there is no Preposition along with the root and no option is allowed but नुम् must be added when a Preposition precedes as प्रालम्भि प्रलम्भम् ।

As regards those roots which governed two objects (I 4 51 S 539) the question arises ' with regard to what object, the principal or the secondary should the tense affixes, &c. be added ? Or should they be added with *regard to both ? This query is answered by the following* verse —

' The tense affixes are added with regard to the *secondary* object after (the twelve roots) दुह् &c (*of the verse given under S 539*) ; and with regard to the principal object after नी ह कृष् and वह । As regards

the causative roots meaning 'to understand' 'to eat' 'to teach or make sound (See I 4 52 S 540) *any* one of the two objects may be chosen as one desires for the purposes of being made the agent of the Passive verb) As regards other causative roots the Passive tense-affixes &c., are added with regard to the prayojya —object

Note —That object which gets this designation by the sûtra अकथितं च (S 539), i e the akathita object is *secondary* object Those nouns which get the designation of karma or object by S 540 are secondary objects.* That noun which was *agent* of the non causative verb and which gets the designation of *object* in the causative verb is called prayojya-object The other causatives referred to above are roots which mean 'to go, and which are intransitive

Thus गौर्दुह्यते पयः देवदत्तेन By Devadatta the cow is milked milk' from देवदत्तो गां दोग्धि पयः । Here गां the *secondary* object of the Active voice has become agent in the Passive voice Similarly with *kritya* affixes as गौर्दोग्धव्या or दोहनीया पयः So also गौः सुदोहा or दुर्दोहा पयः ।

Similarly अजा ग्रामं नीयते from ग्राममजां नयति । Here the *principal* object of नी has become the agent in the Passive So also with ह्रियते कृष्यते and उह्यते । So also अजा ग्राममेतव्या नयनीया नेया &c

With roots meaning 'to understand &c we have बोध्यते माणवकं धर्मः or बोध्यते माणवको धर्मम् । Here the agent of the Passive may be the principal or the secondary object indifferently from the causative बोधयति माणवकं धर्मम् ।

From the causatives of roots meaning 'to go we have देवदत्तो ग्रामं गम्यते D is made to go to the village from गमयति देवदत्तं ग्रामं 'he causes D to go to the village Here Devadatta is prayojya-object of the causative, and it is made the agent of the Passive

Ishti —The tense affixes may be used Passively or Impersonally after Intransitive and after roots that govern an object of time As मासो or मासं वा आस्यते देवदत्तेन ।

But after a causative of such a root the affix comes with regard to prayojya object. As मासमास्यते माणवकः 'the boy is made to sit for a month'

Here ends the Chapter on Impersonal and Passive Verbs.

—— o ——

अथ कर्मकर्तृतिङ्प्रकरणम्।

CHAPTER XXI.

REFLEXIVE VERBS

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते। स्वव्यापारे स्वतन्त्रत्वात्। तेन पूर्वं करणत्वादिविवक्षायामपि संप्रति कर्तृत्वात्कर्तरि लकारः। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्मवत्तु कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकास्तेभ्यो भावे कर्तरि च लकारः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु।

When in order to express the notion of the extreme facility of the action of the verb it is not desired to express the operation of the agent, then other kârakas also get the designation of the agent (kartâ). Because they are independent in their own sphere of action and whatever is independent is called kartâ (I 4 54 S 529). Therefore though in its original state, it might have been an instrument or any other kâraka, in the present state, since it denotes agency, it becomes the Nominative of the verb in the active voice. Thus साध्वसिश्छिनत्ति 'the sword cuts very well.' Here though the sword was the instrument in the former state (असिना छिनत्ति 'he cuts with the sword') yet since no stress is laid on the real agent namely, the person who cuts but the action of the cutting was well done, as if the agent was nobody but that the sword itself did the whole work. In fact when prominence is intended to be given to any particular kâraka, it is put in the Nominative case. Similarly काष्ठानि पचन्ति 'the fuel cooks,' स्थाली पचति 'the pot cooks,' here the original was स्थाल्यां पचति। Here the locative has become the Nominative, expressing that the pot has so largely contributed to the action of cooking that we can say 'the pot has cooked. In fact the quality of the pot determines the quality of the cooking so where it is intended to express where the quality of the pot is very good there the pot is put in the Nominative case.

Thus an Instrument or a Locative kâraka becomes kartâ.

But where it is wished to express the extreme good quality of the object in other words when it is intended to make the object the agent, then there is this difference that the transitive verbs of the original sentence generally become intransitive in the second and the conjugation is either impersonal or the tense affixed denote the agent, namely those roots which govern only one object become intransitive in the reflexive state while the roots which govern ordinarily two objects remain transitive in the reflexive also, but they can now govern only one object, because

one of the two objects has become the agent When the verb has become intransitive the result is that it is conjugated either in the Impersonal or it denotes the agent Thus पच्यते ओदनेन 'it is cooked by the rice' भिद्यते काष्ठेन 'it is split by the wood.' In other words the rice and the wood are so good, that there is no difficulty, on the other hand there is extreme facility in cooking them that is the rice becomes cooked of itself and the wood splits as if of its own accord These are examples of roots which govern one object Of verbs which govern two objects the following examples may be given —मथ्नाति सागरोऽमृतम् 'the ocean churns the ambrosia' i e सागरममृतं मथ्नाति 'he churns the ambrosia out of the ocean' Another example is स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ।

Some say that the secondary object of the roots governing two objects can only become the agent of the reflexive verb This is however doubtful because we find examples like अजा ग्रामं नयति । दुह्यते ब्रजे गौः स्वयमेव &c

We have said that when an object becomes an agent in the Reflexive, the verb is conjugated either in the Impersonal or in the Active voice Examples have already been given of the Impersonal use but when it denotes the agent namely when the reflexive verb is conjugated in the active voice or technically when the tense affixes denote the agent, then the following sûtra applies by which all the rules of the Passive conjugation of the ordinary verbs are applied to the active conjugation of the Reflexive

२९६६ । कर्मवत्कर्मणा तुल्यक्रियः । ३ । १ । ८७ ।

कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । कर्तुरभिहितत्वात्प्रथमा पच्यते ओदनः । भिद्यते काष्ठम् । अपाचि । अभेदि । ननु भावे लकारे कर्तुस्तृतीया स्यादस्मादतिदेशादिति चेन्न । लकारवाच्य एव कर्ता कर्मवत् । लिङ्याशिष्यङ् (३४३४ इति द्विलकारकात् लः इत्यनुवृत्तेः । भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः । अत एव कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति । किं तु भाव एव । भेत्तव्यं कुसूलेन । ननु पचिभिदोः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनं च । सैवेदानीं कर्तृस्था न तु तत्तुल्या । सत्यम् । कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः । 'कर्मणा' इति किम् । करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत् । क्रिय । कर्तृस्थक्रियेभ्यो मा भूत् । गच्छति ग्रामः । आरोहति हस्ती अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति वा । यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्था क्रिया नेतरत्र । न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते । करोतिरुत्पादनार्थः । उत्पत्तिश्च कर्मस्था । तेन कारिष्यते घट इत्यादि । यत्नार्थत्वे तु नैतदिति [illegible] ध्येत् । [illegible] कर्तृस्थत्वात् । एतेनानु[illegible]मानेऽर्थे इति व्याख्यातम् । कर्तृस्थत्वेन [illegible] स्यात्मनेपदम् । "सकर्मकाणां प्रतिषेधो वक्तव्यः" । यगभावात् [illegible] कृत ओलोपे च रूपसिद्धेः । [illegible] अन्योन्यं स्पृशतः । अजा ग्रामं नयति । "दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्" ।

2766 The क denoting the agent is treated as if it were a क denoting the object when the action affecting the agent is similar to the action which affects the object.

This rule substitutes operations (kâryâtidesa S. 2745) This direction implies the substitution for the operations incident to a tense affix or ल denoting an agent of all the operations which fall to be performed when the tense affix or ल denotes the object Hence there shall be the affixing of यक् (III 1 67, S 2756) the employment of Atmanepada terminations (I 3 13 S 2679) the substitution of चिण् for च्लि (III 1 66 S 2758) and the treatment of the word as direct d in sûtra VI 4 62 S 2757 (Dr Ballantyne) Thus भिद्यते काष्ठं स्वयमेव the wood splits of itself" अभेदि काष्ठं स्वयमेव 'the wood splits of itself So also the aorist अपाचि and अभेदि।

Will not by force of this atidesa the agent become the object when the verb is conjugated in the Impersonal Mode? No The atidesa says the agent expressed by the tense affix is treated like the object i e the *Active voice* is treated like the *Passive voice* and not that the (noun) agent becomes the (noun) object The present sûtra III 1 87 (S 2766) is preceded in the Ashtâdhyâyî by the two sûtras III 1 85 and III 1 86 namely व्यत्ययो बहुलम् and लिङ्याशिष्यङ् (S 3433 and 3434) When these two sûtras are read together as *one* sentence then by sandhi the anusvâra becomes ल् as व्यत्ययो बहुलल्लिङ्याशिष्यङ्। From this double लल, one is read by anuvritti in the present sûtra. Therefore we explain the present sûtra by saying लकारवाच्यः कर्ता कर्मवत्। But in the Impersonal verb the agent is never expressed by the tense affix The tense affixes in the Impersonal have no indicatory force as regards the agent.

The result of this is that in the Reflexive verbs we have no kritya derivatives, or Past Participles with क्त or the adding of affixes having the force of खल्।

Note —The affix *kta* ought to have been omitted from the above as we find it in the Reflexive As भिन्नः कुसूलः स्वयमेव। So also भिन्नः प्राकारः स्वयमेव।

These affixes (*kritya*, *kta* and *khalartha*) are found in the Impersonal mode only As भेत्तव्यं कुसूलेन।

Obj The actions of the verbs 'to cook' and 'to split' when regarded as affecting their object, mean 'to soften &c the rice &c and 'to divide into two the wood &c That very action (of softening and dividing which we found formerly in the object) we now find affecting the agent it is a case of *identity* of action and not *similarity* of action—why do you say then *similarity* (tulya).

Ans —True. Really there is no *absolute* difference in the action, when it affected the object in the ordinary verb as ओदनं पचति and when it affected the agent in the Reflexive as पच्यते ओदनः स्वयमेव but as there is a grammatical difference namely the noun which was in the nominative case before is now in the accusative case, so there is a difference in

their status and condition, and so there is a difference in the syntactical agreement of the action in the two verbs——relying on this grammatical and linguistic difference, the word *tulya* has been used

Note —Tulya means similarity, and consequently it implies difference But in पचति ओदनः स्वयमेव and ओदनं पचति there is no such *basic* or intrinsic difference. Hence the above objection The answer to it in short is that though there is no essential difference yet there is *external* difference. For the *state* of an agent is certainly different from the *state* of an object, though the thing itself remain the same Therefore an action related to an agent is different from that very action when related to an object.

Why have we used the word कर्मवत् 'similar to the object'? The rule will not apply when the action affects in a similar say the Intrumental kâraka or a Locative kâraka. Therefore in साधु असिः छिनत्ति 'the conjugation is Active both in the original असिना छिनत्ति and the Reflexive

Moreover, the rule does not apply when the *action* affecting the *agent* is similar in both cases As ग्रामं गच्छति he goes to the village गच्छति ग्रामः the village goes So also आरोहति हस्ती ।

अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च ।

यत् कृपाबलतस् तस्मै नमोऽस्तु गुरवे सदा ॥

"Salutation be always to that Teacher by the force of whose grace, the sense of the scriptures is understood and is remembered and faith is enkindled"

Note —In English these must be put in Passive construction, but not so in Sanskrit.

Obj A root or dhâtu generally denotes two things, the production of some effect, and the operation itself Both are included in the word action. The thing related with the operation is agent, that related with the product is object. Now the roots 'to cook', 'to split', or 'to go' and 'to mount' being Transitive, the product of these inheres in the object and so to cook and to split are similar 'to go' and 'to mount', how can it be known that the roots like 'to go', 'to mount, inhere in the agent only.? To this the answer is given below.

Where some specific *change* is seen in the object, by the action of the verb, as the action of cooking produces a definite change in the object cooked, for rice before cooking is different from the rice after cooking, or a wood before splitting is different from the wood after splitting there alone we say that '*the action is in the object*.' and not anywhere else But no such difference is seen in a *village before* one *goes* to it, and *after* one goes to it, as we see in the case of cooked and uncooked rice There-

fore verbs like 'to go' 'to understand' 'to remember' &c, are such where '*the action is in the agent*' For a scripture learned or a thing remembered remains the same both before and after the act Similarly 'he mounts the elephant', the verb 'mounts' is an action which remains in the agent for the elephant remains the same before the mounting and after it

In other words the roots meaning 'to make' karoti in the sense of *producing, and production are those whose action penetrates the object* (karmastha kriyâ) As कारिष्यते घटः &c The इट is chin vad by VI 4 62. S 2757 In the alternative the ordinary इट will come under VII 2 70 S 2366 (The Conditional is अकारिष्यत or अकरिष्यत। Benedictive कारिषीष्ट or कृषीष्ट। I Fut कारिता or कर्त्ता। Pass कारिषीष्ट स्वयमेव। Aor अकारि। (But this is not the case with regard *to verbs which denote the mere exertion or effort* of the agent

Such verbs never become Passive by the present sûtra कर्मवत् कर्मणा &c Because 'exertion or effort', is like 'knowledge', 'wishing &c essentially actions inhering in the agent (kartristha) Thus has been explained what verbs may be conjugated in the Passive Mood when used Reflexively, and what verbs cannot be so conjugated

The form अनुभवत्स्यमान is to be explained in the same way in the sentence अनुभवत्स्यमानेऽर्थः The verb is kartristha so there is no यक of the Passive Mode, the vikarana श्यन् is added the णि is elided and so the above form is obtained Thus अनु+ वि + अव + णी + श्यन् + मान = अनुभव + णु + य + मान (VII 3 71 S 2510)

How do you add the Atmanepada affix शानच् (मान) to the णी when you do not treat the verb like a Passive? The affix is not शानच् but the tâchchhilya affix चानश्

In देवदत्त यज्ञदत्तौ अन्योन्यं स्पृशतः 'Devadatta and Yajñadatta touch each other here D and Y are both agents and objects should the conjugation be Passive in the Reflexive of स्पृशतः under these circumstances' No because of the following vârtika

Vârtika —Prohibition must be stated of the Transitive verbs Thus अन्योन्यं स्पृशतः। So also अजा ग्रामं नयति।

Vârtika —The two Transitive roots √duh 'to milk and √pach to *cook diversely are conjugated in the Passive when used Reflexively*

२७६७। न दुहस्नुनमां यक्चिणौ। ३। १। ८९।

एषां कर्मकर्त्तरि यक्चिणौ न स्तः। दुहेरनेन यक एव निषेधः। चिण्तु विभाष्यते। अदुग्ध। गौः स्वयमेव दुग्धे।

2767 The affix यक् (III 1 67) and चिण् (III 1 62) are not employed in the reflexive voice of the verbs दुह् 'to milk', स्नु 'to fall in drops' and नम् 'to bow'.

